विदितचरमेव तत्रभवतां भवतां यद्गुरुवराणामाज्ञानुसारेण वयं "श्रीपरिमलसंशोधनप्रकाशनमन्दिरम्" इति प्रथितामिमां संस्थां तस्मिन्नेव हि वत्सरे वैशाखशुक्लचतुर्दशीशुभदिने श्रीनृसिंहजयन्तीसमलङ्कृतमङ्गलमुहूर्ते उद्घाटयाम इति ।

तदारभ्य वयमनेकान् देशान् सञ्चर्य बहुदेहश्रमेण धनव्ययेन च तत्र तत्र विद्यमानविद्वद्धार्मिकमहोदयगृहस्थान् सम्प्रार्थ्य तेभ्यः नैकग्रन्थान् सम्पाद्य सङ्गृहिम। साम्प्रतं वयं सहस्राधिकान् ग्रन्थान्, तत्रापि अप्रकाशितानपूर्वान् शताधिकान् हस्तलिखित-तालपत्रात्मकान् ग्रन्थान् समगृण्हीम इत्यमुं विषयं विबुधवरेभ्यः वाचकमहोदयेभ्यो निवेदयितुमतिमात्रं मोदामहे।

प्रकाशनमन्दिरस्योद्देशाः

१) प्राचीनग्रन्थानां सङ्ग्रहः, २) तेषां संरक्षणम्। ३) संशोधनम्। ४) सम्यक् सम्पाद्य मुद्राप्य प्रकाशनम्। ५) संस्कृत भाषामयानां ग्रन्थानां आपण्डितपामरोपयोगाय कर्णाटकाङ्ग्लादि देशीयभाषास्वनुवादकरणं प्रकाशनञ्च। ६) सुरभारती-कर्णाटक-भाषा-हरिदाससाहित्यप्रसारः। ७) पण्डितप्रकाण्डान् तत्र तत्र संप्रेष्य तैरुपन्यासद्वारा द्वैततत्त्व-धर्म-संस्कृति-श्रीगुरुसार्वभौम-महिमप्रसारकरणम्। ८) तदर्थं "परिमल" मासपत्रिकाप्रकटनम् इत्याद्यनेकेऽस्मत्प्रकाशनमन्दिरस्योद्देशाः।

एतावन्तं कालमस्माभिः श्रीदोड्डबल्लापुरं वासुदेवाचार्य-दुर्गं भीमाचार्य-आचार्य वेङ्कोबाचार्यप्रमुखपण्डितोत्तमानां सहाय-सम्पदा संशोधनपूर्वकमधोनिर्दिष्टग्रन्थाः प्रकटीकृताः।

१. श्रीसुमतीन्द्रविजयकाव्यम्।
२. दृष्टान्तशतकम्।
३. ब्रह्मसूत्रन्यायसङ्ग्रहः।
४. श्रीमध्वतत्त्ववादः।
(Madhva's Tattva Vada)
५. प्रातःसङ्कल्पगद्यम्।

६. द्वैतवेदान्तः ।
७. शैवसर्वस्वखण्डनम् ।
८. भेदविद्याविलासः ।
९. नारदीयशिक्षा ।
१०. सनातनधर्मप्रदीपः ।
११. श्रीगुरुचरितम् ।
१२. श्रीहरिगुरुस्तवराजः ।
१३. श्रीहरिगुरुकीर्तनताराहारः ।
१४. श्रीकमलेशकीर्तनमञ्जरी ।
१५. उपसंहारविजयः ।
१६. सत्तत्वरत्नावलिः । (Sri Suyamindra Tirtha Commemoration Volume)
१७. श्रीरामचारित्रमञ्जरी ।
१८. श्रीराघवेन्द्रविजयमहाकाव्यम् ।
१९. श्रीराघवेन्द्रस्वामिनः । (कर्णाटकभाषायां)
२०. दैत्यबालकप्रह्लादः (कर्णाटभाषायां) ।
२१. शैवसर्वस्वखण्डनम् (द्वितीयमुद्रणम्) ।
२२. जगद्गुरुश्रीराघवेन्द्रस्वामिनः (हिन्दीभाषायां) ।
२३. ,, (The Great Saint of South India) ।
२४. ,, (कर्णाटकभाषायां–द्वितीयमुद्रणम्) ।
२५. प्रमेयनवमालिका (अणुमध्वविजयः व्याख्या समलंकृतः) ।
२६. मन्त्रालयप्रभुः (कर्णाटकभाषायां) ।
२७. कर्णाटकदेशीयहरिदासाः (कर्णाटकभाषायां) ।
२८. तीर्थप्रबन्धः (कर्णाटकव्याख्यासंवलितः) ।

२९. महाभारत-मन्थनम् (कर्णाटकभाषायां)।
३०. समत्सुजातीयम् (,,)।
३१. परिमलार्यपट्टाभिषेकः (,,)।
३२. श्रीगुरुगुणस्तवनम्
(कर्णाटकभाषाव्याख्यासंवलितम्)।
३३. श्रीधीरेन्द्राष्टकम् ।
३४. श्रीविष्णुसहस्रनामस्तोत्रम् ।
३५. अजय्य-विजयीन्द्राः (कर्णाटकभाषायां)।
३६. श्रीहरिगुरुस्तवराजः (द्वितीयमुद्रणम्)।

किञ्च तत्व-धर्म-संस्कृति-श्रीगुरुसार्वभौममहिम्नां प्रसारणाय अस्मदीयश्रीपरिमलसंशोधनप्रकाशनमन्दिरद्वारा "परिमल" इत्यभिधांजुषं कर्णाटकभाषामयीं सांस्कृतिकमासपत्रिकामपि प्राक्तनैकोनविंशतिवर्षाण्यारभ्य प्रकटयन्त एव वर्तामह इति विषयोऽपि विदित एव सर्वेषां विदुषाम् ।

आर्थिकसाहाय्यरहिता अपि वयमेतावत्पर्यन्तं कथमपि प्राचीनग्रन्थ-परिमलमासपत्रिकाप्रकाशनादिकमाचरन्तः श्रीहरि-वायु-सुरसरस्वती-गुरुसार्वभौमसेवां, विबुधवरशुश्रूषाञ्च निर्वहन्तः वर्तामहे।

श्रीमद्राघवेन्द्रतीर्थपूज्यपादानां तथा श्रीमत्सुयमीन्द्रतीर्थगुरुवराणामनुग्रहबलेन वयमिदानीं श्रीगुरुसार्वभौमत्रिशतमानोत्सव-परिमलप्रकाशनमन्दिररजतमहोत्सवशुभप्रसङ्गे पूर्वोक्तोभयोत्सव-संस्मरणार्थं श्रीमत्सर्वज्ञाचार्यमहासंस्थानाधीशनञ्जनगूडु - श्रीमद्राघवेन्द्रगुरुवर्यदिग्विजयविद्यासिंहासनेऽधुनाविराजमानानां निरुपमविद्यौदार्यगुणसम्पन्नानामस्मत्कुलगुरूणां परमपूज्यानां श्रीमत्सुजयीन्द्रतीर्थश्रीपादानामाज्ञानुसारेण तदाशीर्वादबलेन, श्रीगुरुसार्वभौमभक्तानां धर्माभिमानिनां धनसहायेन च, अधो-

निर्दिष्टान् ग्रन्थान् मुद्राप्य प्रकटीकृत्य श्रीमद्भयो विद्वद्वरेभ्यः गुरुभक्तवरेभ्यश्च प्रदातुं सन्तोतुष्यामहे ।

त्रिशतमानोत्सव–रजतोत्सवप्रकाशनम्

१. परतत्त्वप्रकाशिका–श्रीविजयीन्द्रतीर्थपूज्यपादविरचिता ।

२. श्रीकृष्णचारित्रमञ्जरी–श्रीराघवेन्द्रतीर्थविरचिता (श्रीलक्ष्मीनारायणाचार्यविरचितव्याख्यासमलङ्कृता) ।

३. श्रीरामचारित्रमञ्जरी — ,, द्वितीयमुद्रणम्) कर्णाटकभाषानुवाद संवलिता—विद्यावैभवश्रीराजा एस्. गुरुराजाचार्यविरचिता) ।

४. काठकोपनिषत्खण्डार्थः — श्रीराघवेन्द्रतीर्थविरचितः ।

५. प्रमेयसङ्ग्रहः — ,,

६. तत्त्वसंख्यानम् – टीका-श्रीविजयीन्द्र –राघवेन्द्रगुरुवर्यटिप्पणीद्वयसमलङ्कृतम्) ।

७. श्रीमन्न्यायसुधापरिमलप्रसरः (अद्वैततत्त्वसुधाविमर्शः) दि. विद्यारत्नं आचार्यवेङ्कोबाचार्यविरचितः) ।

८. श्रीकृष्णचारित्रमञ्जरीविवरणम् (कर्णाटकभाषानुवादः–विदुषा राजाश्रीगुरुराजाचार्येणविरचितः)।

९. काठकोपनिषत्सारः — विदुषा श्रीसाणूरु भीमभट्टेनविरचितः (श्रीराघवेन्द्रगुरुवर्यखण्डार्थानुसारिकर्णाटकभाषानुवादः) ।

१०. तत्त्वसंख्यानम्— (टीकासहितटिप्पणीद्वयस्य कर्णाटकभाषानुवादः — विदुषा रित्यभिजनवेङ्कणाचार्येणविरचितः) ।

११. भारतदेशीयसंस्कृतिपरिचयः (कर्णाटकभाषायां)
विद्यारत्नश्रीराघवेन्द्राचार्यपञ्चमुखीमहोदयविरचितः)।

१२ श्रीमन्न्यायसुधा— (Sri Nyaya Sudha)।

१३. जगद्गुरु श्रीराघवेन्द्रस्वामिनः (कर्णाटकभाषायां)।

१४. ,, ,, (हिन्दीभाषायां)।

१५. ,, (आङ्ग्लभाषायां)

१६. परिमल मासपत्रिकाविशेषसञ्चिका।
(कर्णाटकाङ्ग्ल-हिन्दी-संस्कृतभाषामयी)

वयमिदानीमुपर्युक्तग्रन्थप्रकाशनविषये-मातृकाप्रदान-संशोधन - सम्पादन - मुद्रण - शुद्धप्रतिकृतिकरण-मुद्रिताक्षरवाचन-समीकरण - कर्णाटकाङ्ग्लहिन्दीभाषानुवादकरण - कर्णाटकाङ्ग्ल प्रस्तावनादिलेखनप्रदान - ग्रन्थमुद्रणोपयोगिपत्रप्रदान-धनप्रदानादिभिरस्माकं साहाय्यमाचरितवद्भ्यः श्रीमद्भ्यः पं॥ राजा. एस. वेणुगोपालाचार्य, पं॥ राजा एस्. लक्ष्मीनारायणाचार्य, पं॥ रा. जयरामाचार्य, चि. हुलि. वे. पवमानाचार्य, पं॥ प्रो॥ के. श्रीनिवासाचार्य, पं॥ प्रो॥ के. टि. पाण्डुरङ्गी, पं॥ आर्. एस्. पञ्चमुखी, पं॥ रित्ति वेंकण्णाचार्य, पं. श्री हावेरी श्रीनिवासाचार्य, पं॥ रित्ति कृष्णाचार्य, श्री एच्. वि. पद्मनाभाचार्य, डा॥ वि. एन्. कृष्णमूर्तिशर्मा, पं॥ प्रो॥ एस्. वि. भीमभट्ट, पं॥ एस्. के. वेङ्कटरमणाचार्य, पं॥ पि. पि. लक्ष्मीनारायण उपाध्याय, श्री. कौजलगी (Sri Brindavan Printers & Publishers) श्री एच्. वेङ्कोबराय (Chitra Printry) श्री पि.ए. उपाध्याय महोदय (Upadhyaya Press) श्री श्रीनिवासशास्त्री (Mysore Hindi Mahila Seva Samithi Press) श्री वि.एस्. वैद्यनाथ ऐयर (Manager Sri Parimala Press) श्री सि. एल्. नारायण (Vani Press)

श्री कृष्णगुण्डाचार्य, श्री एच्. वि. कृष्णाचार्य, श्री राजा जि. सुधीन्द्रकुमार, श्री ए. भुजङ्गराय (Sri Parimala Prakasha Press) श्री एस्. ए. नञ्जनगूड्, श्री पि. वि. जयतीर्थाचार्य, श्री पि. वि. गुरुराज, श्री पि. वि. श्रीनिवास, श्री एस्. कृष्ण, श्री ए. वि. नागराज, श्री रित्ति वंडाचार्य, श्री आर्. के. गिरिराज, श्री के. कृष्णाचार्य, श्री आर्. डि. श्रीपादाचार्य, श्री एच्. वि. शास्त्री (Mysore Paper Mills Ltd. Bangalore) महोदयेभ्यः आस्माकीनान् अनेकान् धन्यवादान् सामोदं समर्पयामः।

अस्मद्गुरुवर्यश्रीमत्सुयमीन्द्रतीर्थगुर्वन्तर्गतश्रीमद्राघवेन्द्रगुरुसार्वभौमाः तथा श्रीमध्वाचार्यान्तर्गतः भगवान् श्रीलक्ष्मीवेङ्कटेश्वरः ग्रन्थप्रकाशने साहाय्यमाचरितवद्भ्यः श्रीमद्भ्यः आयुरारोग्यैश्वर्यसत्सन्तानादिसन्मङ्गलान्यनुगृण्हन्त्विति सभक्तिप्रकर्षं संप्रार्थ्य विरमामः।

सर्वेजनाः सुखिनो भवन्तु
समस्तसन्मङ्गलानि भवन्तु
स्वस्ति पन्थामनुचरेम

विरोधिकृत् सं।
श्रावणकृष्णद्वितीया
भानुवासरः
नञ्जनगूडु
८-८-१९७१

इति विद्वज्जनवशंवदः
प्रकाशकः
श्रीपरिमलसंशोधन-प्रकाशन
मन्दिरम्

॥ श्रीः ॥

॥ विद्याऽऽत्मनिभिदाबोध: ॥

उपोद्घातः

समुद्यत्स्वालोकक्षणरचितवाचंयमवधू-
शिलाभावाभावस्फुटविदितसंसिद्धमहिमा ।
महीकन्याकान्तः करकलितकोदण्डविशिखः
अभीरामोरामश्श्रियमपरिमेयां दिशतु नः ॥

श्रीमदानन्दतीर्थेन्दुभासनं मम मानसे ।
आशासे साधुशब्दार्थसरिदीशाभिवृद्धये ॥

श्रीमतो राघवेन्द्रस्य नमामि पदपङ्कजे ।
कामिताशेषकल्याणकलनाकल्पपादपौ ॥

राघवेन्द्रकुमाराय विद्वत्कुमुदबन्धवे ।
लक्ष्मीनारायणार्याय नतयस्सन्तु मामिकाः ॥

सुखतीर्थमताब्धीन्दुं सुधीन्द्रसुतसेवकम् ।
सुधापरिमलासक्तं सुयमीन्द्रगुरुं भजे ॥

आपादमौलिपर्यन्तं गुरूणामाकृतिं स्मरेत् ।
तेन विघ्नाः प्रणश्यन्ति सिध्यन्ति च मनोरथाः ॥

महदिदं प्रमोदस्थानं नः यच्छ्रीमत्परिमलाचार्यापरनामविभूषितानां श्रीमद्राघवेन्द्रतीर्थगुरुसार्वभौमानां त्रिशतमानोत्सवस्य, श्रीपरिमल संशोधनप्रकाशनमन्दिररजतोत्सवस्य च शुभप्रसङ्गे श्रीमन्त्रालयस्वामिपादविरचिताः १) श्रीकृष्णचारित्रमञ्जरी २) श्रीरामचारित्रमञ्जरी ३) काठकोपनिषत्खण्डार्थः ४) प्रमेय-

संग्रहः ५) तत्त्वसंख्यानटीकाटिप्पण्यादिप्रबन्धप्रवराः संस्कृत-कर्णाटकोभयव्याख्यासंवलिताः प्रकाशनपथमधिरोहन्तीति ।

"माहात्म्यज्ञानपूर्वस्तु सुदृढस्सर्वतोऽधिकः । स्नेहो भक्तिरिति प्रोक्तः तया मुक्तिर्नचान्यथा ।" इति श्रीभगवत्पादीयवाक्यानुसारेण श्रीहरिवायुगुरुभक्तिजननाय, गुरुभक्तिमन्तरा हरिभक्त्यनुदयात्तदर्थं गुरुभक्तिजननायैहिकामुष्मिकफलप्रदानपटीयसां श्रीराघवेन्द्रगुरुवराणां महिमातिशयनिरूपणपरं पुरावृत्तमत्र किञ्चिन्निरूप्यते ॥

कृतयुगे सत्यलोके श्रीचतुराननसेवातत्परःशङ्कुकर्णाख्यः कर्मजदेवः श्रीपवमानस्य विशेषावेशयुक्तः भगवत्सङ्कल्पमनुसृत्य लोककल्याणार्थं ब्रह्मशापादसुरकुले प्रह्लादनाम्ना अवततार । दानवधूर्वहतनूभवः मातृगर्भस्थ एव श्रीनारदमुन्युपदेशाद्विदितनिखिलहरितत्त्वः रहितासुरभावः आजन्मवैष्णवः जितेन्द्रियः कृष्णग्रहगृहीतात्मा स महात्मा प्रह्लादराजः हरिभजनपरायणः स्वान्तप्रशान्तसात्त्विकशक्त्या विष्णुभक्त्या प्रत्यक्षीकृतश्रीनृकण्ठीरवः "अहं तवात्मदानेच्छुः त्वन्तु भृत्यत्वमिच्छसि" इति नरहरिणा प्रशंसितस्तदनु भगवता "भवन्ति पुरुषा लोके मद्भक्तास्त्वामनुव्रता" इत्यनितरसाधारणवरं सम्पाद्य जगति नितरां कीर्तिमलभत ॥

स एव प्रह्लादराजः बाह्लीक – व्यासराज – रूपेणावतीर्य श्रीयादवकुलशेखरं श्रीकृष्णं संसेवयामास । पुनरपि श्रीचतुराननकरकमलपरिपूजितचतुर्युगमूर्तेः श्रीमूलरामचन्द्रप्रभोः पूजां, अध्यात्मतत्त्वधर्मप्रसारणं – द्वैतसिद्धान्तस्थापनं – ग्रन्थरचनं आपण्डितपामरजनोद्धरणं – जगत्कल्याणादिकं च चिकीर्षुः, देवदेवस्य

श्रीरमाजाने स्सङ्कल्पमनुसृत्य श्रीमद्राघवेन्द्रतीर्थगुरुसार्वभौमरूपेण स्वीकृतचरमावतारः श्रीमन्मन्त्रालये विराजत इति श्रीनृसिंहपुराणवचनेन * अपरोक्षज्ञानिनां हरिदासवराणां पदपद्यसुलाविवचनैश्चा* वगम्यते ॥

---

* शङ्कुकर्णाख्यदेवस्तु ब्रह्मशापाच्च भूतले ।
प्रह्लाद इति विख्यातः भूभारक्षपणे रतः ॥
स एव राघवेन्द्राख्ययतिरूपेण सर्वदा ।
कलौ युगे रामसेवां कुर्वन्मन्त्रालयेऽभवत् ॥ "

—श्रीनृसिंहपुराणम्

* i) "ಪ್ರಹ್ಲಾದದೇವನೇ ವ್ಯಾಸಮುನಿ ರಾಘವೇಂದ್ರರು ।
ಅಹುದೆಂದು ಭಜಿಸಿರೋ ವಿಜಯವಿಠಲನ ॥"

—ಶ್ರೀ ವಿಜಯದಾಸರು.

ii) "ಪ್ರಥಮ ಪ್ರಹ್ಲಾದ ವ್ಯಾಸಮುನಿಯೇ । ಯತಿರಾಘವೇಂದ್ರ ॥"

—ಶ್ರೀ ಗೋಪಾಲದಾಸರು.

iii) "ಶ್ರೀ ರಾಘವೇಂದ್ರ ಬಾರೋ ॥
ವ್ಯಾಸರಾಯನೆನಿಸಿ ನೃಪನ । ಕ್ಲೇಶ ಕಳೆದವನೆ ಬಾರೋ ॥"

—ಶ್ರೀ ಜಗನ್ನಾಥದಾಸರು.

iv) ತುಂಗಾತೀರದಿ ನಿಂತ ಸುಯತಿವರನ್ಯಾರೆ ಪೇಳಮ್ಮಯ್ಯ ॥
ಖೂಳಹಿರಣ್ಯಕನಲ್ಲಿ ಜನಿಸಿದ ಪ್ರಹ್ಲಾದನು ತಾನಿಲ್ಲಿಹನಮ್ಮ ॥"

—ಅಭಿನವಜನಾರ್ದನವಿಠಲರು.

v) " ಕೂಸಿನಕಂಡಿರ್ಯಾ । ಸುಪ್ರಹ್ಲಾದನಕಂಡಿರ್ಯಾ ॥
ಬಾಲಪ್ರಹ್ಲಾದನಾಗಿ । ಖೂಳಕಶ್ಯಪುವಿಗೆ । ಲೋಲಶ್ರೀನರಹರಿಯ ।
ಕಾಲರೂಪವತೋರ್ದ । ವ್ಯಾಸನಿರ್ಮಿತಗ್ರಂಥ......ಮೆರೆವ ವ್ಯಾಸಮುನಿಯೆ ॥
ಮಂತ್ರಗೃಹದಲಿ ನಿಂತ ಸು । ಯತಿವರ್ಯ ॥ "

—ಮಧ್ವೇಶವಿಠಲರು.

प्रातःस्मरणीयोऽयं श्रीराघवेन्द्रयतिवरः ज्ञानप्रसारकृते कृतावतारस्य श्रीहंसनामकपरमात्मनः परमपावनसदन्ववाये राराज्यमानानां बळित्थादिमन्त्रवर्णैरनुवर्णनीयाना*मपर्णाधवशर्वेन्द्रपूर्वैरपि संस्तूयमानानां श्रीमत्पावनपवमानावताराणां श्रीमदानन्दतीर्थभगवत्पादाचार्याणां वेदान्तसाम्राज्यविद्यासिंहासने क्रिस्ताब्दीय १६२१ वर्ष मारभ्य १६७१ वर्षपर्यन्तं पञ्चाशद्वर्षकालं व्यराजत ।

यतिशेखरोऽयं त्रय्याः अपूर्वसुबोधव्याख्यारचनेन वैदिकवाङ्मयमलञ्चकार । चतुःशास्त्रेष्वनितरसाधारणप्रबन्धप्रवरप्रणयनेन पण्डित प्रवरेषु कृपाञ्चकार। अत एव जगन्मान्योऽयं श्रीमत्पूर्णप्रमतिप्रणीत समग्रभाष्याणां श्रीमज्जयमुनिरचितनिखिल टीकानां निपुणतरटिप्पणीरचनकौशलेन निष्कण्टकं द्वैतसिद्धान्तमांचन्द्रतारकं संस्थाप्य "टिप्पण्याचार्य" इति विबुधवरैरस्तूयत ।

अयञ्च महात्मा विरिञ्चप्रपञ्चरञ्जित कविसञ्चयसन्देहपरिच्छेदाय श्रुतिस्मृति ब्रह्मसूत्रजातस्य प्रेक्षावदभिमतार्थप्रकाशनाय च "मन्त्रार्थमञ्जरी-तन्त्रदीपिका-न्यायमुक्तावलि-प्रमेयसङ्ग्रह - भाट्टसङ्ग्रह - पञ्चसूक्त विवरणा"दि स्वतन्त्रग्रन्थरत्नानि विरचय्य

---

* a) "इदन्ते पात्रं सनवित्तमिन्द्र पिबासोममेनाशतक्रतो ।
पूर्ण आहावोमदिरस्य मध्वो यं विश्व इदभिहर्यन्ति देवाः ॥"

—ऋग्वेद अ. ८

b) "मध्वो वो नाम मारुतं यजत्राः" —मरुत्सूक्तम्

c) "विष्णोः पदे परमे मध्व उत्सः।" —श्रुतिः

d) "तृतीयमस्य ऋषभस्य दोहसे
दशप्रमतिं जनयन्त योषणः ॥"

— बळित्थासूक्तम्

"सर्वतन्त्रस्वतन्त्र" इति नैजविरुद्रमन्वर्थमकार्षीत्। यतिपुङ्गवोऽसावष्टाचत्वारिंशत्ग्रन्थान्प्रणीय सुरसारस्वतभाण्डागारं समवर्धयत्। अनेन मुनिवरोऽयं विबुधप्रपञ्चे अजरामरकीर्तिमलभत।

"उभयवंशाब्धिचन्द्रमा" इति प्रथितयशाः श्रीमद्वादीन्द्रतीर्थश्रीमच्चरणः श्रीमन्त्रालयस्वामिपादविरचितग्रन्थानां, तद्वैशिष्ट्यानां, श्रीपरिमलाचार्याणामसदृशमहिम्नः दैविकगुणानाममरचरितस्य च निरूपणकृते "श्रीगुरुगुणस्तवन"मिति प्रथितं ग्रन्थरत्नमेव व्यरीरचत्। ग्रन्थेऽस्मिन्नाध्यात्म-काव्य-स्तोत्रीयांशाः चकासति।

यद्यपि श्रीराघवेन्द्रमुनीन्द्रस्य चरितादिकं विदितमेव समेषां विदुषाम्। तथापि सम्प्रदायमनुसृत्यात्र गुरुसार्वभौमस्य कालदेशादिकमधिकृत्य सूक्ष्मतया किञ्चिन्निरूपयितुमिष्यते॥

॥ श्रीः ॥

श्रीगुरुवराणामन्ववायः

विदितचरमेवेदं यत्परमपुण्यतमेऽस्मिन्भारतवर्षे सुविख्यातः षाष्टिकवंशः[1] चतुर्दशनिरवद्यविद्यानां मातृस्थानमिति। तदेकदेशसदन्ववाये "वीगमुद्रे"[2] इतिप्रथिते प्रकृतकृतिनायकः श्रीराघवेन्द्रगुरुसार्वभौमः अवततार। अस्य गुरुवरस्य प्राञ्चः (पूर्वजाः) षाष्टिककुलसञ्जाताः कदम्ब-राष्ट्रकूट-देवगिरि-विजयनगर प्रमुखसाम्राज्येषु सचिव-सेनानी-दण्डनायक-अर्थसचिव-

1. अरवत्तुवक्कलु वंशः।

2. अर्थसचिवं अथवा राजधनागाराध्यक्षं कर्णाटकभाषायां वीगमुद्राधिकारी इति व्यवहरन्ति।

महास्थानविद्वत्प्रमुखमहोन्नतपदाधिरूढाः साम्राज्यहितचिन्तन-संवर्धन - तत्त्व - धर्म - संस्कृति - विद्याप्रसारणादिकं निर्वहन्तः प्रथितयशसः अभूवन् ।

अखण्डभूमण्डलमण्डनायमाने पण्डितप्रकाण्डमण्डिते कर्णाटकसाम्राज्ये विजयनगरीयराजस्थाने पावनषाष्टिककुलशेखरः गौतमगोत्रीयः न्यायवेदान्तशास्त्रपारावारपारीणः गान्धर्वकलास्वपि पारङ्गतः वीणा कृष्णाचार्य इति सुगृहीतनामा भूसुरवरः व्यराजत । सः स्ववंशबन्धुभिः विजयनगरीयसंस्कृतविश्वविद्यानिलयकुलपतिभिः जगन्मान्यैः श्रीव्यासराजगुरुसार्वभौमैरादृतः चक्रेश्वरेण मानितः विबुधमण्डलीलाल्यमानः अमलां कीर्तिमलभत । कर्णाटकरमारमणः श्रीकृष्णदेवरायः अस्मात् गन्धर्वकलामधीत्य स्वगुरुमेनं विशेषतः सममानयत् ।[1]

वीणा कृष्णाचार्यस्य कनकाचलाचार्यनामकः पुत्र आस । तस्य तिम्मण्णाचार्याभिधः पुत्र आसीत् । स एव महात्मा श्रीराघवेन्द्रयतिराजस्य पूर्वाश्रमीयः तातपादः ।

श्रीतिम्मण्णाचार्यः न केवलं न्यायवेदान्तादिशास्त्रेषु, अपि तु वीणावादनेऽपि स्वपितामह इव निष्णातः व्यराजत । तस्य धर्मपत्नी गोपिकाम्बा द्वितीयापदाधिरूढापि नैजसद्गुणैरद्वितीया सर्वजनमहिता व्यलसत् । अनयोः श्रीवेङ्कटेश्वरानुग्रहबलेन वेंकटाम्बा इति दुहिता गुरुराज इति पुत्रश्च अजायेताम् ।

---

1. " उपदिश्य स कृष्ण भूवरालेर्निजगान्धर्वकलां कलामगृण्हात् ।
घनमौक्तिकगुच्छहारपूर्वां विरुदालीं गुरुदक्षिणापदेशात् ॥ "
—श्रीराघवेन्द्रविजयमहाकाव्यम् ।

श्रीतिम्मण्णाचार्यस्य अगाधवैदुष्यादिकं समवलोक्य प्रमुदितमनाः कर्णाटकचक्रेश्वरः "दिवादीप" गौरवेण तमाचार्यं सममानयत्।[1] श्रीमन्मध्वाद्यपीठाधीशः मानसपूजाधुरन्धरः श्रीमत्सुरेन्द्रतीर्थश्रीमच्चरणोऽपि स्वपूर्वाश्रमबन्धवे पाग्निककुलभूषणाय अस्मै कर्णाटभूरमणीधवेन श्रीरङ्गराजेन[2] प्रदत्ते ग्रामवरे वृत्तिमेकां अकल्पयदिति श्रीरङ्गराजताम्रशासनादवगम्यते।[3] क्रिस्ताब्दीय 1565 तमे वत्सरे "रक्षसतंगडि"[4] महाकदने विजयनगरपतनानन्तरं निराश्रितैरनेकै विबुधवरैस्समं कथंकारं तिम्मण्णाचार्योऽयं विद्यानगराद्विर्गत्य तञ्जापुरं समागत्य तद्राजास्थाने चव्वप्पनायकभूपालेन सम्मानितः तदाश्रयेऽवर्धत। तदनु निजबन्धूनां कुलगुरूणां श्रीमत्सुरेन्द्र – विजयीन्द्रतीर्थानामाज्ञानुसारेण कुम्भकोणं समागत्य श्रीमठ एव सगौरवं न्यवसत्।

एवं व्यतीते बहुकाले कुलदीपकं श्रेष्ठगुणमण्डितं पुत्रमेकं पुनरपि प्राप्तुकामः श्रीतिम्मण्णाचार्यः स्वपत्न्या गोपिकाम्बिकया वेङ्कटशैलमासाद्य देवदेवं श्रीनिवासं क्षीरव्रतादितपसा सभक्ति-

---

1. " अभजन् नृपतेर्दिनप्रदीपं श्रुतविश्वक् प्रबलप्रतापरश्मिम्।
दिनमण्डनुवर्तितस्य शान्त्यै स्वसमानेतरवाकृतमिस्राशेः ॥
—श्रीराघवेन्द्रविजयः।

2. Srirangaraja II (1572–1586 A. D.)

3. (a) " ....वृत्तिमन्तोत्र लिख्यन्ते......।
याजुषो गौतमगोत्रो वीणे तिम्मप्पयोऽपि च ॥"

(b) Copper Plate— 21 (1575 A. D.) Mys. Arch. Report— 1944.

4. कदनमेतत् "ताळेकोटिकदन "मिति कतिपये ऐतिहासिकविमर्शनपटवः वदन्ति।

श्रद्धमसेवत। तेन प्रसन्नो भगवान् श्रीवेङ्कटेश्वरः स्वप्ने "जगन्मान्यमसाधारणं पुत्रं प्रदास्ये" इति संस्तूय सकरुणं वरमदात्।

श्रीशालिवाहनशके १५१८ तमे श्रीमन्मथसंवत्सरे फाल्गुण शुक्ल सप्तम्यां गुरुवासरे (1598 A. D.) मृगशीर्षनक्षत्रे श्रीगोपिकाम्बा श्रीनिवासदेववरप्रसादेन सर्वलक्षणसम्पन्नं पुत्रं ऐन्द्री पूर्णचन्द्रमिव प्रासोष्ट।[1] अहो लोककल्याणकातरः भागवताग्रेसरः प्रह्लादरविः पुनरुदैत्।

आनन्दाम्बुधिनिमग्नः तिम्मण्णाचार्यः वैदिकविधिमनुसृत्य जातकर्म-नामकरणादिमहोत्सवं निर्वर्त्य श्रीवेङ्कटेशानुग्रहसञ्जातः निजसुतोऽयं वेङ्कटशैलमित्र इव लोकविख्यातः सर्वजनवन्दनीयपादारविन्दश्च भूयादिति सुतं वेङ्कटनाथनामानमकार्षीत्[2]। स एव बालकः अस्मत्कथानायकः श्रीराघवेन्द्रगुरुसार्वभौमः। वेङ्कटनाथः शरच्चन्द्र इव बन्धुकुमुदामोदी अवर्धत ॥

तिम्मण्णाचार्यः श्रीशके १५२० तमे हेमलम्बसंवत्सरे (1601 A. D.) स्वसुतस्य चौलाक्षराभ्यासादिमहोत्सवं न्यवर्तयत्। तदानीमेव वेङ्कटनाथप्रदर्शितामश्रुतप्रतिभां[3] समव-

1. "अथ विष्टसुतं द्विजेन्द्रपत्नी शुभलग्ने परिपूर्णदृष्टिभाजि।
अखिलद्विजराजवन्दनीयं द्विजराजं दिगिवामराधिपस्य ॥"
—श्रीराघवेन्द्रविजयः ३-४२

2. "उदयास्तपटीरहेमपृथ्वीधरपर्यन्तधराचरैर्जनौघैः।
अभिवन्द्य इतीव बालकस्य व्यतनोद्वेङ्कटनाथनाम तातः ॥"
—श्री. रा. वि. ३-४८

3. "विलिख्य भूमौ प्रथमं कुमारं रेखामिमामोमिति सम्पठेति।
पित्रा नियुक्तः पुनरब्रवीत्तमल्पे कथं सा गुणपूर्णसंज्ञा ॥"
—श्री. रा. वि. ३-४४

लोक्य सज्जनाः "अहो शिशुरयं देवांशसम्भूत" इति प्रशशंसुः।[1]

महामहिम्नः पुत्रस्य मङ्गलाभ्युदयावलोकनजातसन्तोषानुभवभाग्यहीनौ पितरौ स्वर्गतौ। पितृसुखवञ्चितः वेङ्कटनाथः समाश्रिताग्रजः श्रीगुरुराजाचार्यस्य लालनपोषणादिभिरवर्धत। तन्निकट एव वेङ्कटनाथः नानालिपिकोषकाव्यादिकमधिजगे।

श्रीशके १५२५ तमे शुभकृत्संवत्सरे वैशाखमासे (1605-1606 A.D.) वेङ्कटनाथः अग्रजेनैव उपनीतः ब्रह्मोपदेशमलभत। तदनु गुरुराजाचार्यः मधुरानगरवास्तव्यस्य राजास्थानविदुषः स्वभगिनीपतेः श्रीलक्ष्मीनृसिंहाचार्यस्य निकटं विद्याभ्यासाय कुमारं वेङ्कटनाथं प्राहिणोत्। सोऽपि कुमारः तस्मिन्नेव हि श्रीकृष्णः सान्दीपिन्याचार्य इव साङ्गान्वेदान् काव्यनाटकालङ्कारादिसाहित्यं न्यायवेदान्तमीमांसा व्याकरणादिशास्त्राणि च सम्यगधीत्य बाल्य एव निरतिशयवैदुष्यमवाप॥[2]

तारुण्यपदमधिरूढमनुजं वेङ्कटनाथं गुरुराजाचार्यः सत्कुलप्रसूतया सद्गुणमण्डितया सङ्गीत-साहित्यकलावत्या सरस्वतीनाम्न्या कन्ययासह श्रीशके १५३७ तमे आनन्दनामसंवत्सरे (1616-1617 A. D.) सानन्दमुद्वाहयत्। श्री वेङ्कटनाथाचार्योऽयमद्वितीयोऽपि सरस्वतीद्वितीयः कतिपयकालं कावेरीपत्तने सुखमुवास। कालक्रमेण आचार्यवर्यः सरस्वत्यां कुलदीपकं पुत्रमलभत। तं कुमारं लक्ष्मीनारायणाभिधानेनालञ्चकार।

---

1. "अश्रुतप्रतिभा यस्य श्रुतिस्मृत्यविरोधिनी।
   विश्रुतं नरजातं च तं विद्याद्देवसत्तमम्॥"

2. उपाददत्तं कुतुकेन शेमुषीनिधिः स लक्ष्मीनरसिंहदेशिकम्।
   तपोधिसान्दीपिनिभृगुरोत्तमं यथा यशोदातनयस्त्रयीमयम्॥
   —श्री रा. विजयः ४-९

वेङ्कटनाथसुधीमणिरयं नैजपाण्डित्य-प्रतिभादिषु समारूढ-मेरुशिखरोऽप्यसदृशदारिद्र्यानुभवप्रसङ्गमापेदे ।

अत्र किञ्चिद्विचिन्त्यते ॥ विबुधवरोऽयं शङ्कुकर्णाख्यमूलरूपः । सत्यलोके चतुराननसेवानिरतस्यास्य दारिद्र्यानुभवावकाश एव नासीत् । तदनु श्रीप्रह्लादबाह्लीकराजावतारसमये अखण्ड भूमण्डलसार्वभौमपदमधिरूढः राजराज इव व्यराजत । तदानीमपि दारिद्र्यनामाप्यमुं नास्पृशत् । अथ कलियुगे स्वीकृतश्रीव्यासराजावतारः कर्णाटकसाम्राज्ये राजगुरुपदभूषितः व्यलसत् । अतोऽप्यस्मिन्नवतारे साम्राज्यलक्ष्मीः दारिद्र्यलक्ष्मीं दूरतो निस्सार्य गुरुवरममुं समुल्लासयत् । अत एवास्मिन् चरमावतारे दारिद्र्यदेवताया अवश्यं स्थानं दातव्यमिति मनसि निधायाचार्योऽसौ स्वयमेव प्रकाममाकिञ्चन्यमन्वभवदिति सुवचम् ।

यतः दारिद्र्यदेवताया याच्ञां सार्थकीकर्तुं दारिद्र्यावस्थायां मानवेन संयमनं न हातव्यमितिनीतिं स्वनिदर्शनेन बोधयितुं च घोरतरदारिद्र्यं समाह्वयत् । तच्च श्रीहरिचित्तमिति मन्वानः ससन्तोषमन्वभवत् ।

आचार्यस्यास्य दारिद्र्यपरमावधिं श्रीराघवेन्द्रविजयकारः एभिश्श्लोकैर्हृदयङ्गमतयाऽवर्णयत्—

"अब्दस्यैकं वत्स्यतो नास्य नव्यं स्थूलं वस्त्रं
सन्ततञ्चाल्पमौल्यम् ।
नव्यं वस्त्रं नैव सूक्ष्मं कदाऽपि क्षौमे तस्मिन् का
कथा किञ्चनस्य ॥ १९ ॥

तैलाभ्यङ्गं वत्सरस्यैकवारं नैतस्यास्ति प्राज्यमाज्यं
कथं स्यात् ।
अग्निष्टोमे नाधिकारी कथं स्याज्जोतिष्टोमे जात्य-
संस्थाधिकारी ॥ २० ॥

काले काले लभ्यते नास्य भुक्तं लब्धं चेत्तद्भुज्यते
हन्त भूमौ ।
पात्राभावादेकदा नार्थितेऽपि क्षुद्बाधायाः शान्ति-
मेवालभिष्ट ॥ २१ ॥
छिन्ने वस्त्रे भिन्नपानीयपात्रे जीर्णस्थल्यां दस्युभि-
र्नीयमाने ।
प्रागाकृष्टं भावि कौपीनमस्य छागे यागे प्रागि-
वाभूत्प्रयाजः ॥ २२ ॥
विष्णोरेको वासरो वर्धमानेऽलोकेकृतः पञ्चषस्तस्य गेहे ।
इष्टौ पञ्चैवोदितास्ते प्रयाजाश्चातुर्मास्येष्वेधमाना
नवासन् ॥ २३ ॥
एवं चेदप्यादराद्धोकृचिह्नं सन्धार्यायं शास्त्र-
मुख्यादजस्रम् ॥ ”

एतादृशदुर्धरदारीद्र्यदुःखसन्तप्तहृदयः वेङ्कटनाथाचार्यः अत एव करुणारसार्द्रहृदयः पुरतः स्वीय सर्वज्ञसिंहासनाधिपत्य-समये, किंबहुना सर्वदाद्यापि शरणागतान् कामधेनुरिव, अर्थि-जनान् कल्पवृक्ष इव, निष्किञ्चनान् चिन्तामणिरिव कलिकल्मषा-कुलितेऽस्मिन् कलावपि सकलान् सफलमनोरथानाकलयन्विल-सति मन्त्रालयेति निश्चप्रचम् ॥

न्यायवेदान्त – व्याकरण – मीमांसादिशास्त्रीयोद्ग्रन्थानधि-जिगमिषुर्वेङ्कटनाथाचार्यः कुम्भकोणमासाद्य सर्वतन्त्रस्वतन्त्रात्

पदवाक्यप्रमाण पारीणान्निजकुलगुरोश्श्रीसुधीन्द्रतीर्थश्रीचरणात् षड्दर्शनीवैदग्ध्यमतुलं लेभे।[1] स्वयञ्च चतुश्शास्त्रपाठप्रवचनादिकं निर्वहन् स्वगुरुकरुणावशंवदः कांश्चिदब्दानैषीत्।[2]

कृतिरचनकुतूहली वेङ्कटनाथाचार्यः आगमकोविदनिगदित मार्गेण श्रीनारायणपण्डिताचार्यप्रणीतस्य "अणुमध्वविजय" काव्यस्य "गूढभावप्रकाशिका"भिधां सरलसुन्दरीं व्याख्यामतनोत्। अनेनैव हि व्याख्याप्रणयनेन सुप्रीतः पावनः पावमानिः स्वीयवेदान्तविद्याराज्येऽभ्यषिञ्चत्, तदवलोक्य वीणापाणिरपि स्वीय सारस्वतसिंहासनेऽपि निजधव इव पनमभ्यषिञ्चदितिश्रीवादीन्द्रतीर्थश्रीमच्चरणः "गुरुगुणस्तवने"निपुणतरं सोत्प्रेक्षमुपावर्णयत्॥[3]

वाक्यार्थविजयः

अथ कदाचिद्वेङ्कटनाथाचार्ये स्वगुरुश्रीसुधीन्द्रतीर्थ श्रीचरणेनसमं देशेषु सञ्चरतिसति दक्षिणद्वारकेतिविख्याते राजमन्ना-

1. शाब्दं भाष्यं जयदेवीं च टीकां भाट्टंतन्त्रं भामतीं गौरव ञ्च।
व्यासार्योक्तां चन्द्रिकां वेङ्कटार्यः यद्वद्वेद्यं तत्तदभ्यस्यतिस्म॥
—श्री रा. विजयः ६–७

2. "प्रातः स्नात्वा साधुवेदान्तभाष्यं शाब्दं पश्चात्तर्कशास्त्रं ततस्तः।
पूर्वतन्त्रं चावदद्वेङ्कटार्यस्तुर्ये यामे कांश्चिदब्दानैषीत्॥"
—श्री. रा. वि. ६–८

3. "धीरश्रीराघवेन्द्रं कृतनिजविजयस्रग्धरार्थप्रकाशं
दृष्ट्वा सन्तुष्टचेता: दशमतिरचिरादभ्यषिञ्चत्पदे स्वे।
नूनं वाणी तदीयाननलिनगता तत्कृतस्वप्रियैक–
प्रत्यासङ्गप्रहृष्टा स्वयमपि तदनु स्वेपदे चाभ्यषिञ्चत्॥"
—श्रीगुरुगुणस्तवनम्–१६

कुगुडिक्षेत्रे देवालयसभामण्डपे अद्वैतयतिभिस्समं वाक्यार्थप्रसङ्गे श्रीवेङ्कटनाथाचार्यः पाणिनिव्याकरणशास्त्रे अनितरसाधारण-पाण्डित्यप्रदर्शनपूर्वकं विजयमलभत।[1] अनेन मोदमानमानसः मुनिपुङ्गवः श्रीसुधीन्द्रपूज्यपादः स्वशिष्यप्रवरमाचार्यं "महा-भाष्याचार्य" इति महाप्रशस्तिप्रदानेन विद्वत्सभायां निभृत-मन्वग्रहीत्।[2]

अन्यदा 'महाभाष्याचार्यः' वेङ्कटनाथसुधीमणिः तञ्जापुर-राजास्थाने प्रधानसचिवस्य चतुश्शास्त्रकोविदस्य श्रीयज्ञनारा-यणदीक्षितस्य समक्षं श्रीसुधीन्द्रयतिवराध्यक्ष्ये प्रचलितविद्वत्स-भायां "काकतालीय" शब्दमधिकृत्य प्रवृत्ते विषयविचारे तप्तमुद्राङ्कनविषये च तत्रत्यान् पण्डितप्रकाण्डान् विजित्य नितान्तमशोभत।[3] विद्यापक्षपातिना दीक्षितवरेण तञ्जापुरीशेन च आचार्योऽयमतीव सम्मानितो रेजे॥

---

1. "दण्डेनान्यस्ताडितः कुण्डलीव प्साधातोर्यङ्लुगन्तस्य रूपम्
शस्त्रन्तस्येत्यर्धवाक्ये स पाप्सत्तस्येत्युक्त्वा वादिनं पृच्छतिस्म ॥
एतद्धातोः किं यगन्तस्यरूपं ब्रूहीत्युक्ते चिन्तयन्नर्धयामे ।
तत्रत्यानां दैशिको मायिभिक्षु स्तूष्णीमासीदुत्तरेऽभासमाने ॥"
— श्री. रा. वि. ६–१२–१४

2. "दृष्ट्वा सर्वं देशिकः श्रीसुधीन्द्रः प्रागज्ञातं कौशलं शाब्दशास्त्रे ।
प्राचीनाख्यां तां महाभाष्यपूर्वां प्रादादस्मै पश्यतां पण्डितानाम् ॥"
—श्री. रा. वि. ५–१५

3. तञ्जापुर्यामन्यदा शुल्बसूत्रं व्याख्यातारं वावदूकं जयन्तम् ।
राज्ञो विद्वान्यज्ञनारायणेज्या शीलोत्तंसस्तं ननन्दातिमात्रम् ॥
कालेनास्मिन् काकतालीयशब्दे जेतारं तं यायजूकान्कवीन्द्रान् ।
तस्यां पुर्यां तप्तमुद्राङ्कने च प्रौढं मेने यज्ञनारायणस्तम् ॥
— श्री. रा. विजयः ६–१६–१७

श्रीसुधीन्द्रयतिशेखरः श्रीसर्वज्ञाचार्यप्रेरणानुसारेण वे
नाथाचार्यं स्वीयवेदान्तविद्याराज्येऽभिषेक्तुं संकल्प्य तदर्थमा
मेनमबोधयत्। गुरुवचनमाकर्ण्य वेङ्कटनाथाचार्यः—

"क्वाहं न्यासः कुत्र वा वेदविद्यासाम्राज्यं ते
विद्याहमार्य।

पारंसिन्धो र्भारमूढ्वा विवेकी गन्तुं यत्नं को
सन्तनो
इत्युक्तस्तं प्राह नावोहि वह्नः शान्तिर्दान्तिर्घीर
तोदारता
केतुस्तासां मत्प्रसादो गरीयान् विद्यन्ते किं
सिन्धुया
एकान्ते तैर्बोधितः प्रत्यवादीद्वालाभार्या बालक
नोपनी
बालश्चाहं नाश्रमे मेऽस्ति वाञ्छा निर्बन्धश्चे
मिष्यामि नूनम्

इत्यादिक्रमेण वराश्रमस्वीकारं नान्वमन्यत।

पुनरपि देशिकभरुणा बहुप्रकारमुपदिष्टो वेङ्कटनाथा
गुरूक्तं श्रुत्वाऽशृण्वन्निव स्वगृहं प्रत्यागतः। तत्र तस्मिन् वि
क्रांतिस्समजनि। 'स्थास्यामश्चेल्लभ्यते संयमित्वम्। ग
श्चेत्तेऽधुना मां शपेरन्। स्थातुं शक्यं नैवगन्तुञ्च शक्यं
कुर्मः?' इति वेङ्कटनाथाचार्यः चिन्ताक्रान्तो बभूव॥

तस्यामेवरजन्यां एवमाचार्ये स्वगुर्वाज्ञां चिन्तयति
साक्षाद्विद्यालक्ष्मीः तस्य पुरतः प्रादुरासीत्। स्वदर्शनेनाश्च

मामाचार्य संबोध्य वीणापाणिः "अयि विद्वद्राय ! मां विद्या-
जानीहि। तव गुरौ वत्सरद्वन्द्वमेव मम वासः। तद्रद्-
व्याख्याने लब्धवर्णः त्वत्समः विद्वत्सङ्घे नान्योऽस्ति।
श्रीमूलरामः पूज्यते तस्मिन्नेव मम वासः भगवता वेदव्यासेन
तः। तस्य पूजापि कर्मन्दीन्द्रैरेव कृत्ता। तस्मादहं तेषु
वसामि। वेङ्कटार्य! निराश्रया त्वय्यहं वासं याचे।
सआश्रम स्वीकारपूर्वकं मह्यमाश्रयं देहि। शीघ्रं वराश्रमं
त्य विद्याराज्यं शाधि" इत्युपदिदेश।[1]

तदनु परमहंसाश्रमस्वीकाराभावे वैष्णवसंप्रदायस्यागामि-
परम्परादिकं निरूप्य सुरभारती पुनरप्येवमाचष्टे—
ार! गृहस्थाश्रमिणा त्वया क्रियमाणशुश्रूषापेक्षया स्वीकृत
ाश्रमेण त्वया निर्वर्त्यमानया सेवया ममातीव हर्ष उदेति।
श्रये मोदमानाहं क्षणमपि त्वां न त्यजामि। अन्यकर्मन्दिनं
पे न स्मरामि! आवयोश्च परस्पराधीनत्वमपरिहार्यं वैधम्!"[2]

जानीहि त्वं वेंकटार्य त्वदार्ये वासो यन्मे वत्सरद्वंद्वमेव।
तद्व्याख्याने लब्धवर्णो नचास्ति विद्वत्संवे नैवभावी त्वदन्यः॥
श्रीरामार्चा पूज्यते येन तस्मिन्वासो यन्मे कल्पयद्व्यासदेवः।
कर्मन्दीन्द्रैरेव पूजापि कृप्ता तस्मात्स्वाहं तेषु नित्यं वसामि॥
तस्मादङ्गीकृत्य कर्मन्दिभावं राजा विद्याराजलक्ष्म्या भव त्वम्।
—श्री. रा. वि. ६-५२-५४

नेदानीं मे तादृशस्संप्रमोदः पारिव्राज्यं यादृशः प्राप्यते चेत्।
सम्प्राप्ता त्वां नत्यजामि क्षणं वा स्वप्नेवाऽहं न स्मराम्यन्यभिक्षुम्।
विध्यायत्तं ते यतित्वं न शक्यं त्यक्तुं प्राप्तं त्वद्वशत्वं ममापि।
—रा. वि. ६-६४-६५

इति वेङ्कटनाथाचार्यं वराश्रमनिश्चयमतिं विधाय प्रसन्नहृदया स्वीयमन्त्रमस्योपदिश्य क्षणादन्तर्दधौ ॥ [1]

सुरभारतीसन्दर्शनजनितसहर्षपुलकोद्गमः आचार्यः समग्रमेनमुदन्तं गुरवे न्यवेदयत्। तदाकर्ण्य हर्षनिर्भरो यतिपुङ्गवः तमाचार्यं घनकनकवस्त्ररूपसम्पदंप्रदाय "ससन्तोषं लक्ष्मीनारायणकुमारं ब्रह्मोपदेशादिना संस्कृत्य तुरीयाश्रमस्वीकाराय सिद्धो भव" इति आदिदेश। वेङ्कटनाथसूरिः स्वकुमारं लक्ष्मीनारायणमुपनयनसंस्कारेण ब्रह्मविद्याधिकारिणं विधाय स्वीयकुटुम्बभरणभारं निजाग्रजे श्री गुरुराजाचार्ये निधाय देशिकसार्वभौमेण साकं तञ्जापुरीमयाय ॥

परमहंसाश्रमस्वीकारः वेदान्तसाम्राज्याभिषेकश्च

तदनु श्रीमत्सुधीन्द्रतीर्थयोगीन्द्रः स्वशिष्यस्य तञ्जापुरेशितुः रघुनाथभूपालस्यास्थानसभायां राज्ञः विबुधसन्दोहस्य समक्षं श्रीशके १५४३-४४ तमे दुर्मतिनामसंवत्सरे फाल्गुणशुक्लद्वितीयायां (1621 – 1622 क्रिस्ताब्दे) शुभमुहूर्ते श्रीवेङ्कटनाथाचार्याय परमहंसाश्रममनुजग्राह। [2] ततः श्रीमत्पूर्णप्रमतिविद्यासाम्राज्य-

---

1. इत्युक्त्वा सा मन्त्रमस्योपदिश्य स्वीयं देवी पश्यतोऽन्तर्दधेऽद्धा ॥
—श्री. रा. वि. ६–६५

2. लग्ने लग्नगुणे निलिम्पगुरुणा दृष्टे विमृष्टे द्विजै
रेनं संमदभागषीहि भगवो ब्रह्मेत्युदीर्य स्थितम् ।
आलोक्योपदिदेश दैशिकवरस्तस्मै सतारं पुरा
स्वप्नेऽस्वप्नद्गुरापवैभवनिधिर्लब्धां ददौ चाभिधाम् ॥
—श्री. रा. वि. ६–७०

सिंहासने तं नूतनयतिशेखरमलंकृत्य स्वस्वप्नसूचितेन "श्रीराघवेन्द्रतीर्थश्रीपादा"भिधानेनसह[1] स्वामृतहस्तेन साम्राज्यपट्टाभिषेकं निर्वर्त्य वरकुमारकं द्वैतसाम्राज्यचक्रवर्तिनं विधाय[2]-श्वेतच्छत्रादिराजचिह्नप्रदानेन सामोदमन्वगृण्हात्॥[3]

नूतनजगद्गुरुः श्रीराघवेन्द्रतीर्थयतिसार्वभौमः बहुकालं गुरुचरणशुश्रूषाचरणपरायणः निजदेशिकाननुसृत्य सञ्चारमाकलयन् 'नवबृन्दावनक्षेत्र'[4] मयासीत्। तत्रैव श्रीसुधीन्द्रतीर्थश्रीमच्चरणाः स्वान्तेवासिप्रियवरकुमाराय निखिलमहासंस्थानाधिपत्यं वितीर्य श्रीशके १५४६ तमे रुधिरोद्गारिसंवत्सरे फाल्गुण सित-

1. तस्य नाम स ददे सदाशिषा राजराज इव राजितः श्रिया ।
रामभद्र इव भद्रभाजनं तत्कृपेव जगतांहिते रतः ॥
श्रीसुरेन्द्रवदयं तपस्यया श्रीजयीन्द्र इव कीर्तिसम्पदा ।
विश्रुतोऽहमिव वादसङ्गरे राघवेन्द्रयतिराट् समेधताम् ॥
—श्री. रा. वि. ६–७१–७२

2. मन्त्रैःपूतै र्वारिजाद्यैः प्रसूनै र्मुक्तामुख्यै रत्नजालैरुपेतैः ।
वार्भिः शङ्खापूरितैः सोऽभिषिच्य प्राज्ञं विद्याराज्यराजं वितेने ॥
—श्री. रा. वि. ६–७३

3. श्रीरामार्चाः व्यासदेवोपलौ द्वौ शास्त्रौघानां पुस्तकं चामरे च ।
श्वेतच्छत्रं स्वर्णयानं सवाद्यं प्रादादस्मै राजचिन्हं स सर्वम् ॥
—श्री. रा. विजयः ६–७४

4. क्षेत्रमेतत् विजयनगरे (हंपि) तुङ्गभद्रापरिवृतं श्रीमध्वाचार्यमुख्य शिष्य श्रीपद्मनाभतीर्थ–कवीन्द्र–वागीश – व्यासराज – गोविन्दवोडेयर–रघुवर्य–सुधीन्द्र–श्रीनिवास–रामतीर्थ–यतिवरवृन्दावनविलसितं माध्वानां यात्रास्थानीभूतं विराजते ।

द्वितीयायां (1624- क्रिस्ताब्दे) नारायणध्यानपुरस्सरं वृन्दावनं प्राविशन्। श्रीराघवेन्द्रगुरुराजः निजगुरुवृन्दावनप्रतिष्ठापनपुरस्सरं महासमाराधनं न्यवर्तयत्॥

श्रीमद्राघवेन्द्रगुरुसार्वभौमः महासंस्थानाधिपत्यप्राप्तेरनुपदमेव समग्रभारते सञ्चारमाकलयन् तीर्थ-क्षेत्रयात्रा-दर्शन-परवादिदिग्विजय-सिद्धान्तस्थापन-पाठप्रवचन - धर्मप्रसार - ग्रन्थरचन-महिमाप्रदर्शन - शिष्य - भक्तजनोद्धारादिलोककल्याणकार्यासक्तः महायशाः राजमहाराजैरनितरसाधारणगौरवसम्मानपरम्परां सम्प्राप्य निखिललोकमान्यश्च व्यलसत्॥ अत्र तद्विषयककतिपयमहिमादिकं निरूप्यते॥

वादिदिग्विजयः

(क) निखिलविद्याकेन्द्रस्थाने मधुरानगरे श्रीतिरुमलनायकराजस्थाने श्रीगुरुसार्वभौमः महामन्त्रि श्रीनीलकण्ठदीक्षितप्रभृतिभिरन्यैश्च विद्वद्वरैर्मीमांसाशास्त्रे वाक्यार्थविचारमाकलय्य विजयमलभत।[1] विद्यापक्षपातिनः श्रीनीलकण्ठदीक्षितमहोदयाः श्रीगुरुसार्वभौमप्रणीतं मीमांसान्यायमुक्तासमलङ्कृतं "भाट्टसङ्ग्रह"ख्यं ग्रन्थरत्नं स्वलङ्कृतराजगजराजमारोप्य सवाद्यगौरवं

---

1. मन्त्रिश्रीनीलकण्ठाभिधमखिमणिना भट्टतन्त्रानुबन्धे
ग्रन्थे तावत्त्वदीये करिणि गुणविदारोपितेऽभ्यर्हणाय।
कीर्तिस्ते राघवेन्द्रव्रतिविबुधमणे नूतमन्यूनवेगा
दिङ्नागानारुरुक्षुः स्वयमपि सहसा धावदष्टौदिगन्तान्॥
—श्रीगुरुगुणस्तवनम्।

चतुर्षु वीथीषु महोत्सवं निर्वर्त्य सबहुमानं यतिवरं सममानयत् । [1]

(ख) कर्णाटकराजधानीभूते वेलूरुनगरे वेङ्कटपतिचक्रेश्वरस्य महास्थानलङ्कृते वीरभद्र-भैरवभट्टनामानौ शैवविद्वांसौ प्रवर्तितवादप्रसङ्गे श्रीराघवेन्द्रमुनिवरः अजीजयत् । तेन प्रमुदितमनाः वेङ्कटपतिसार्वभौमः श्रीचरणवादप्रतिभापाण्डित्यकौशलमुग्धः अमुष्मै गुरुभरवे ग्राममेकं वितीर्य मानयाञ्चकार । [2]

(ग) श्रीविट्ठलक्षेत्रे पण्ढरपुरे शेषनाम्ना प्रख्यातेन पण्डितेन साकं बहुकालं वाक्यार्थचर्चां विधाय निजपरमगुरुभिर्विजयीन्द्रतीर्थपादैः विरचितं "वाग्वैखरी" नामविलसितं ग्रन्थरत्नमवलम्ब्य तदुक्तसद्युक्तिजालैः वावदूकं विजित्य श्रीविष्णुसर्वोत्तमत्वं संस्थाप्यानितरसाधारणीं समज्ञामवाप । [3]

एवमेव सर्वत्र परमतनिराकरणपूर्वकं स्वमतस्थापनमातन्वानोऽयं श्रीगुरुवरः द्वैतविजयपताकामुदडाययत् ॥

1. अचिताम्रपर्णि स निमज्ज तत्तटे लसिताः प्राणम्य नवदेवताः पराः ।
कृतमालिकासरिदलङ्कृतामगान्मधुराभिधां मधुरवाङ्महापुरीम् ।
तदधीशसंसदि विजित्य पण्डितान् बहुमानितो यतिवरो महीभृता ॥
—श्री. रा. वि. ७–४६–४७

2. सोऽथ भल्लपुरभैरवभट्टो वीरभद्र इति विश्रुतविद्वान् ।
नर्मणैव परिभूय नरेन्द्राद्ग्रामरत्नमचिरात्समगृण्हात् ॥
—श्री. रा. वि. ८–४

3. "वाग्वैखरी निर्जितभव्यशेषः ।"
—श्रीगुरुस्तोत्रम्

१. तञ्जापुराधीशः विजयराघवनायकः ग्रामभूमिरत्नहारादीन् समर्प्य अमुं यतिप्रवर्हं असेवत।

२. मधुरापुरवराधीशः तिरुमलनायकः श्रीराघवेन्द्रमुनिं ग्रामभूमिप्रदानेन अपूजयत्।

३. कर्णाटकधरणीधवः वेङ्कटपतिरायः भद्रासने श्रीगुरुवरमलङ्कृत्य कनकाभिषेकं विधाय ग्रामदानपुरस्सरं गौरवमार्पयत्।

४. महीशूरपुरवराधीशः दोड्डदेवरायः श्रीरङ्गपत्तने श्रीरङ्गनाथसन्निधौ क्रिस्ताब्दीय 6-7-1663 तमे वत्सरे "देवराजपुरा" भिधं ग्राममनर्घरत्नाभरणानि च समर्प्य कृतार्थो बभूव।.*

५. कोल्हापुरे बहुकालवास्तव्याय श्रीराघवेन्द्रगुरवे महाराष्ट्राधीशः शिवाजीमहाराजः श्रीचरणतपोमहिमादिभिः प्रभावितः तत्सन्निधिलब्धज्ञानोपदेशः धनकनकादिना गौरवं समर्प्य गुर्वनुगृहीतोऽभूत्।

६. विजयपुर (विजापुर) यवनभूपः इम्मडि इब्राहिं आदिल् शह नामकः गुरुवराय "जगद्गुरुः" इति प्रशस्तिं राजलक्षणीभूतं श्वेतच्छत्रं च सबहुमानं वितीर्य कृतकृत्य आसीत्।

७. यादवपुराधीशः (आदवानीपुरेशः) नवाब् सिद्दीमसूद्खान इति विख्यातो म्लेच्छराजः श्रीगुरुवरमहिमानं परीक्ष्य स्वापराधपरिच्छेदाय मन्त्रालयग्रामं भक्तिपूर्वकं समर्प्य गुर्वनुग्रहपात्रीभूतोऽभूत्।

एवमेवहि सहस्राधिकाः नैके राजानः सचिवसामन्तदण्डनायकप्रभृतयः ग्रामभूमिधनकनकवस्तुवाहनादिकं सगौरवं प्रदाय गुरुकृपाभाजनीभूता बभूवुः॥

---

* Mysore Archaeological Report-1944

महिमाप्रदर्शनम्

(क) तञ्जापुरराज्ये द्वादशवार्षिक्यामनावृष्ट्यामापतितायां राज्ञः धान्यागारे शून्यागारे सञ्जाते परमकारुणिकोऽयं गुरुराजः तत्र बीजाक्षरविन्यासेन धान्यान्यक्षय्याणि विधाय निजतपः-प्रभावेण वृष्टिपतनमारचय्य देशममुमरक्षत्।[1]

(ख) तञ्जापुराधीशेन विजयराघवनायकेन वितीर्णमनर्घं रत्नहारं वीतिहोत्राय समर्प्य परेद्युः पुनरपि होमकुण्डात्तमादाय पूर्वाधिकतेजोविराजितं रत्नहारं प्रदर्श्य सर्वान् राजनश्चाश्चर्यसागर-निमग्नानकलयत्।[2]

(ग) ताम्रपर्णीनदीतीरे समाजबहिष्कृतं शरणागतं भूसुरं शङ्खोदकप्रोक्षणेन पवित्रं विधाय शङ्खोदकमहिमानमदर्शयत्।

(घ) चित्रदुर्गे सकलजनसमक्षं निजभक्तं वेङ्कण्णं पुष्पक-विमानमधिरूढं कृत्वा तस्मै मोक्षमनुजग्राह।[3]

(च) किरीटगिरिग्रामे चूतफलरसभरितभाण्डपतितं वेङ्कप्पदेशायिनः मृतं पुत्रं मन्त्रोदकप्रोक्षणेन उदजीवयत्।[4]

---

1. "ದ್ವಾದಶವರ್ಷಾನ್ನೋದಕ ಸಲಿಸಿದ । ಮೇದಿನಿಪತಿಗೆ ಮಹಾದಯಾವಂತ ॥"
—ಶ್ರೀ ಜಗನ್ನಾಥದಾಸವರ್ಯರು

2. "ಹುತವಹಗುಣಾಗಿದ ರತುನಮಾಲೆಯ । ಕ್ಷಿತಿಪಗೆ ತಂದಿತ್ತತುಳವಾಹಿಮನೆ ॥"
—Abid

3. "ಪ್ರಕಟಿಸಿ ತೋರಿದಿ ಮುಕುತಿಯ ದೇಹದ । ಭಕುತನ ಯೋಗ್ಯತೆ ನಿವರ ಜನರಿಗೆ ॥"
—Abid

4. "ಚೂತರಸಫಲದಿ ಪೋತವಾಣಿಗೆ । ಮೃತಿಹೊಂದಿದ ಬಾಲಕರಿಗೆ"
—Abid

(छ) अन्यदा कारुण्यवारांनिधिः श्रीराघवेन्द्रमुनीन्द्रः निषेकमुहूर्तदिने शय्यागारकवाटताडितशिरस्कं मृतं निजशिष्यं प्राणदानपूर्वकमरक्षत् ।[1]

(ज) शिरसङ्घ्रिदेशायिनः वेदाप्रामाण्यवादिनः स्फर्धालोः दुराशङ्कानिवारणार्थं वेदमन्त्रोच्चारणपूर्वकं मुसलं किसलयितं कृत्वा वेदमहिमानं प्रदर्श्य तेन सम्मानितः तस्मिन्ननुग्रहं चकार ।[2]

झ) पण्ढरपुरदिग्विजयकाले प्रखरसूर्यातपतप्ते निर्जल-निर्जरारण्यप्रदेशे निजशिष्यभार्यायां प्रसूतायां भूमौ योगदण्डाघातेन निर्मलजलोत्सेचनं निर्माय, अम्बरे निजकरवस्त्रोत्क्षेपणेन शीतल छायां विधाय तां सद्योजातशिशुञ्चापालयत् ।[3]

(ट) विजयपुराचिक्कोडिग्रामगमनसमये मध्येमार्गं पिपासाकुलितं जलालाभेन मृतप्रायं भूसुरमेकं मन्त्रशक्त्या जलनिर्माणविधिना समजीवयत् ।[4]

---

1. "ಭೃತ್ಯಗೆ ಬಂದಪಮೃತ್ಯು ಕಳೆದು ಸುಖ । ವಿತ್ತ ಪೊರೆದ
ಪುರುಷೋತ್ತಮದಾಸ ॥"
—ಶ್ರೀ ಜಗನ್ನಾಥದಾಸರು

2. "ಕ್ಷಿಪ್ರದಿ ತೋರಿದಿ ವಿಪ್ರರ ಮಹಿಮೆಯ । ಆ ಪೃಥ್ವೀಶಗೆ ಅಪ್ರತಿ ಗುರುವೇ"
—Abid

3. "ಮಳಲ ಮಾರ್ಗದೊಳು ಲಲನೆ ಪ್ರಸೂತಿಸೆ । ಪುನನ ಕಮಂಡಲದೊಳು
ಜಲತೋರ್ದೆ ॥
ಬಿಸಲಿಂದಳುವಾ ಚಲ್ವಾ । ಗಸದಲಿ ನಿಲಿಸಿದ್ಯೋ ಅಸಮಮಹಿಮನೆ ॥"
—Abid

4. "ವಿಪಿನದಿ ಚಂಡಾತಪದಿ ಬೆಂದ; ಕಾ— । ಶ್ಯಪಸುತನುಳುಹಿದ ಕೃಪಣಜನಾತ್ರ ॥
—Abid

(ठ) मानवीग्रामवर्तिनि श्रीप्राणदेवालये कनकदासवरः द्वितीयजन्मनि चण्डालजनिर्भूत्वा श्रीगुरुवर्यदर्शनस्मारित पूर्वजन्मवृत्तान्तः श्रीराघवेन्द्रगुरुममुं श्रीव्यासराजगुरूं मत्वा अस्मै सर्षपान् समर्पयत्। गुरुवरश्च तान्स्वीकृत्य स्वमहिमानं प्रदर्श्य तमनुजग्राह।[1]

(ड) अस्मिन्नेव हि सन्दर्भे गुरुवरदर्शनार्थं समागतेभ्यः वेणुग्रामाभिजनेभ्यः (बिदरहळ्ळि) श्रीनिवासाचार्येभ्यः स्वमहिम प्रदर्शनपूर्वकं तान् सकरुणमन्वगृण्हात्।

(ढ) कन्दनावतीग्रामवासिनं कञ्चनिजशिष्यं वेङ्कण्णनामानमप्रबुद्धं तत्कृतस्वनामसङ्कीर्तनमाहिम्ना दिवान् वेङ्कण्णपन्त इति बिरुदभाजं आदवानीसचिवपदाधिरूढमतनोत्।

(त) कस्यचन म्लेच्छाधिपस्य नवाबस्य तनये सर्पदष्ट्रे मृते गरुडमन्त्रजपप्रभावेण तमुज्जीवयामास।[2]

(थ) कश्चनशिष्यः विवोढुकामः गुरुवरमृत्तिकाशौचसमये विवाहसहायद्रव्यमयाचत स्मितवदनः गुरुवरः तस्मै अञ्जलिपरिमितां मृत्तिकां प्रदाय "गच्छ, तव विवाहो भविष्यती"ति तमादिशत्। सभक्तिप्रकर्षं स्वीकृतमृत्तिकः सः कस्मिंश्चिद्ग्रामे ब्रह्मराक्षसपीडितगृहे गृहद्वारे सुप्तः निशीथे प्रबुद्धः गुरुमृत्तिकाप्रयोगप्रभावेण ब्रह्मराक्षसं दग्धंविधाय तद्गृहस्वामिना सम्मानितः तज्ज्येष्ठपुत्रीमुदवहत्।

---

1. "ಪತಿತನ ನಿಜಯೋಗ್ಯತೆಯನ್ನರಿತು ಸ। ದ್ಗತಿಯ ಪಾಲಿಸಿದ
ಯತಿಕುಲವರ್ಯ॥"
—ಶ್ರೀ ಜಗನ್ನಾಥದಾಸರು

2. "ಕನಲಿದ ಜನಪನ ಅನುನಯದಲಿ ನಿ। ನ್ನನುಗನ ಮಾಡಿದಿ ಘನತರಚರಿತ॥
—Abid

(द) आदवानीपुरेशः सिद्दीमसूदखाननामा भूपः गुरुवर-परीक्षणार्थं मांसादिकं समर्पितवान्। श्रीगुरुपुङ्गवः मन्त्रितजलोक्षणेन तत् फलपुष्परूपं विधाय स्वमहिमानमदर्शयत्।[1]

एवं विविधं शताधिकं महिमानं प्रदर्श्य श्रीराघवेन्द्रयतिपुङ्गवः जगदपालयत्॥

अयञ्च योगिनायकः वृन्दावनप्रवेशानन्तरं शताधिकेषु वर्षेषु व्यतीतेष्वपि सर् थामस् मन्रोमहोदयाय प्रत्यक्षं स्वदर्शनमनुगृह्य,* किंबहुना? अद्यापि च प्रत्यहमगम्यमहिमादिकं प्रकटीकुर्वन् लोककल्याणकार्यासक्तः अस्ति विराजमानः॥

ग्रन्थरचना

श्रीराघवेन्द्रयतिसार्वभौमः हृद्यत्रय्यन्तविद्या, प्रस्थानत्रय–भाष्यटीकादीन् सम्यग्व्याख्याय विद्वज्जनेषु महोपकारमातन्वानः दिगन्तविश्रान्तधवलकीर्तिमापेदे॥

गुरुवरप्रणीतानीमानि ग्रन्थरत्नानि।

१–३. वेदत्रयविवृतिः

४– मन्त्रार्थमञ्जरी

५–९. पुरुषसूक्तादिपञ्चसूक्तव्याख्याः

१०–१९. दशोपनिषदां खण्डार्थाः

---

1. "ರಾಘವೇಂದ್ರ। ರಾಜಿತ ಗುಣಸಾಂದ್ರ ॥ ಪ ॥
ಅನಿವೇದಿತಭೋಜನವಸ್ತುಗಳಿಂ। ದನುಭವ ಮಾಡಿಸಿದನುಪಮಚರಿತ ॥
ದಾತಗುರುಜಗನ್ನಾಥ ವಿಠಲನ। ದೂತನೆ ಮಂತ್ರನಿಕೇತನ ನಿಲಯ ॥
—ಶ್ರೀ ಜಗನ್ನಾಥದಾಸರು

* "Madras District Gazetteers" Vol. No. 1 BELLARY Chapter XV. Adoni Tq. Page No. 213.
by W. Francis, Esq. I.C.

२०. गीतार्थसङ्ग्रहः (गीताविवृतिः)
२१. गीताभाष्यप्रमेयदीपिकाव्याख्या
२२. गीतातात्पर्यटीकाविवरणम्
२३. तन्त्रदीपिका
२४. न्यायमुक्तावलिः
२५. अणुभाष्यटीका तत्त्वमञ्जरी
२६. सूत्रभाष्यतत्वप्रकाशिकाभावदीपः
२७. श्रीमदनुव्याख्यानन्यायसुधापरिमलः
२८-३७. दशप्रकारणटीकाव्याख्याः
३८. श्रीरामचारित्रमञ्जरी
३९. श्रीकृष्णचारित्रमञ्जरी
४०. श्रीमद्भारततात्पर्यनिर्णयभावसङ्ग्रहः
४१. वादावलीव्याख्या
४२. तत्त्वप्रकाशिकातात्पर्यचन्द्रिकाप्रकाशः
४३. तर्कताण्डवव्याख्या
४४. प्रमाणपद्धतिव्याख्या
४५. अणुमध्वविजयव्याख्या
४६. भाट्टसङ्ग्रहः
४७. प्रातःसङ्कल्पगद्यम्
४८. प्रमेयसङ्ग्रहः

वृन्दावप्रवेशः

स्वावतारपरिसमाप्तिदत्तचित्तः श्रीराघवेन्द्रगुरुसार्वभौमोऽसौ पूर्वं श्रीप्रह्लादावतारसमये स्वानुष्ठितयज्ञवेदिकासमलङ्कृते [1] कुबरदेवदिव्यरदनसम्भूततुङ्गभद्रातरङ्गिणीमङ्गलतरङ्गसम्पाविते श्रीमन्म-

1. ಮೊದಲು [illegible] । [illegible] ।
[illegible] । [illegible]...॥
—ಶ್ರೀ: ಜಗನ್ನಾಥದಾಸರು

न्त्रालक्षेत्रे सप्तशतवर्षकालं सुन्दरवृन्दावनान्तर्गतस्सन् शरणगत-भक्तजन बृन्दावनाय भक्तजनयथायोग्यंदृश्यादृश्यरूपतया विराजितः लोककल्याणंचिकीर्षुः तदर्थं स्वमहिम्ना स्वायत्तीकृतमन्त्रालयग्रामः प्रह्लादावतारकालीनस्वकुलदेवतां साक्षाद्दुर्गारूपां श्रीमन्त्रालयाम्बिकां प्रार्थनया साक्षात्कृत्य, प्रसन्नया तया स्वनिवासभूमिं तपश्चरणवरञ्च लब्ध्वा, पितृवाक्यपरिपालनरतस्य दण्डकारण्ये सञ्चरमाणस्य देवदेवस्य श्रीरामचन्द्रप्रभोः पादपद्मसंस्पर्शपवित्रीकृतेन, नव्येन्द्रोपलेन निर्मापितस्वीयबृन्दावनः, मङ्गलमुहूर्ते निजपूर्वाश्रमीयज्येष्ठभ्रातुः श्रीगुरुराजाचार्यस्य पौत्राय, नैजसन्निधौ समधिगतसमस्तशास्त्राय, अत एव प्रकाण्डपण्डिताय श्रीवेङ्कण्णाचार्यशर्मणे सानन्दवितीर्णपरमहंसाश्रमः, निर्वर्तितमन्त्रमुद्राधारणगुरूपदेशः, संवर्तितश्रीसर्वज्ञविद्यासाम्राज्यपट्टाभिषेकः, अनुगृहीत "श्रीमद्योगीन्द्रतीर्था"भिधानः, अमन्दानन्दमविन्दत ॥

तदनु श्रीशके १५९३ तमे विरोधिकृत्संवत्सरे * श्रावणकृष्णद्वितीयायां कवेर्वासरे सङ्कल्पितस्वीयबृन्दावनप्रवेशः प्रियवरकुमाराय श्रीयोगीन्द्रतीर्थगुरवे समर्पितमहासंस्थानाधिपत्यः, निर्वर्तितजपतपाद्यनुष्ठानः निजपूर्वाश्रमीयबन्धुषु पुत्रपौत्रप्रपौत्रेषु-श्रीलक्ष्मीनारायणाचार्य - पुरुषोत्तमाचार्य- बालकश्रीनिवासाचार्य ** प्रभृतिषु निजगुरुविरहासहमानसेषु, परिखिद्यमानेषु ; तदर्थसम्मिलतपौरजनपदेषु ; अथ सकलाशामुखमुखरितेषु मङ्गलवाद्येषु, सन्ततसंस्तूयमानस्वस्त्ययन - त्रिविधविजयविरुदावलीसमेधितसरसकवितानिचयेषु विबुधवरेषु, गुरुस्तवनभजन-नर्तनपरेषु भागवतेषु, तद्दर्शनजनितपुलकोद्गमेषु सर्वजनेषु सभक्त्यावेगं प्रदीयमानहस्तलाघवेषु श्रीयोगीन्द्रतीर्थेषु, भक्त्यतिशयप्रणम्य-

* 1671 A. D.

** भावि श्रीवादीन्द्रतीर्थश्रीमच्चरणः ।

मानशिरस्सु वेङ्कण्णपन्तप्रमुखसचिवसामन्त – सन्ततिषु करकमलद्वंद्वविलसितदण्डकमण्डलुः स किल गुरुपुङ्गवः, सकरुणमन्दहासविलसितमुखारविन्दसन्दृष्टवन्दारुजनसन्दोहः, निजौदार्यलघीकृतनाकिनायकचिन्तामणिः, शरणजनमन्दारः अलङ्कृताभयवरदमुद्रः, प्रतिपदमुपदिश्यमानरमारमणसर्वोत्तमतत्त्वः, सर्वजनेषु पश्यत्सु सत्सु सशरीरं वृन्दावनान्तर्गतः योगासने सन्निषण्णः, निजहृदयपुण्डरीकसंस्थापितपुण्डरीकाक्षः धृतारुणवसनः करधृतजपमालः, द्वादशादित्यसदृशसंशोभितद्वादशोर्ध्वपुण्ड्रचारुविग्रहः, नारायणमन्त्रपरायणः, निमीलितार्धनयनः, प्रणवोच्चरणपूर्वकं स्वशिरसि स्वाज्ञाविन्यासितानेकशालग्रामः, परममङ्गलमूर्तिः श्रीमद्राजाधिराजराघवेन्द्रगुरुसार्वभौमः, जनदर्शनविदूरोऽपि निजभक्तदर्शनादूरः सुन्दरवृन्दावनमधिष्ठायाप्यातमसहृन्मन्दिरे विलसन्नद्यापि विद्योतते ॥

श्रीमद्योगीन्द्रतीर्थश्रीमच्चरणः श्रीराघवेन्द्रगुरुसशरीरवृन्दावनप्रवेशानन्तरं शिरसाधृतनिजदेशिकादेशः, ससम्भ्रमसमनुष्ठितस्वगुरुवृन्दावनप्रतिष्ठः, तस्मिन्नेव हि मङ्गलदिने समाचरितस्वगुरुमहासमाराधनः, व्यवस्थापितनिजगुरुवृन्दावनसन्निधिपूजाविशेषः, जगत्कल्याणचिकीर्षुः श्रीमन्मध्वाचार्यवेदान्तविद्यासिंहासनाधिरूढः चिरमवर्धत ॥

पुण्यपीयूषपूर्णश्रीगुरुराघवेन्द्रसशरीरवृन्दावनप्रवेशवर्षमारभ्य ऐषमः पर्यन्तं त्रिशतं समाः व्यतीयुः । महामहिम्नः यतिवरस्य त्रिशताब्दीयपुण्दिनेऽस्मिन् श्रीगुरुवराणां त्रिशतमानमहोत्सवः निखिलभारते सभक्तिश्रद्धं सवैभवं समनुष्ठीयमानो राजते ॥

विदितपूर्वमिदं समेषां सुजनानां यच्छ्रीमद्राघवेन्द्रगुरुवरमठाधीश्वराणां ज्ञानभक्तिवैराग्यतपोनुष्ठानप्रथितयशसां श्रीमन्त्रालयविलसितसुन्दरवृन्दावनमन्दिराणां स्वभक्तवृन्दावनासक्तानां प्रातःस्मरणीयानां परमपूज्यश्रीमत्सुयमीन्द्रतीर्थश्रीमच्चरणानामा-

ज्ञानुसारेण १९४५ तमे क्रिस्ताब्दे गरलनगरे (नञ्जनगूडु) श्रीपरिमलसंशोधनप्रकाशनमन्दिरमस्थापीति ॥

श्रीमदाचार्यपरम्परागतानां प्राचीनाचार्याणां वेद-वेदान्त-न्याय-मीमांसा-व्याकरण-काव्य-नाटकालङ्कारादि प्रबन्धप्रवराणां सङ्ग्रह-संशोधन-सम्पादन-प्रकाशनादिकार्यं यशस्वितया निर्वहतोऽस्य प्रकाशनमन्दिरस्य रजतोत्सवं श्रीगुरुसार्वभौमत्रिशतमानोत्सवेन सममिदानीमस्माभिस्ससम्भ्रमं समनुष्ठातुं मोमुदीत्यस्माकं चेतः ।

महदिदं प्रमोदस्थानं नः यच्छ्रीमत्परमहंसेत्याद्यमन्दविरुद-वृन्दभूषितानां श्रीमन्व्यासराजगुरुसार्वभौमानां कर्णाटकविद्या-सिंहासनाधीश्वराणांश्रीमद्विद्यापयोनिधितीर्थश्रीपादानामाध्यक्ष्येऽस्मिन्नेव हि त्रिशतमानमहोत्सव-रजतोत्सवमङ्गलप्रसङ्गे कतिपय-काव्यशास्त्रादिग्रन्थानां तथा 'परिमल' सांस्कृतिक - धार्मिक-मासपत्रिकाविशेषसञ्चिकायाश्च प्रकाशनमद्य श्रीमच्चरणानाममृत-हस्तेन निर्वर्त्यत इति ।

सकृत्पारायणमात्रेण ऐहिकामुष्मिकफलप्रदस्यास्य प्रबन्धस्य तद्व्याख्यानानुसारविरचितस्य कर्णाटकभाषानुवादरूपस्य च ग्रन्थस्य प्रकाशोऽप्यधुना विबुधसन्दोहसन्तुष्टये सानन्दं सोपस्कारं क्रियत इति निवेदयितुं मोमुदीत्यस्माकं चेतः ।

अस्य ग्रन्थस्य पठन-पाठन-पारायणादिना सज्जनाः श्रीगुरु-सार्वभौमपरमानुग्रहपात्रीभूताभवेयुरित्याशास्य विरमामः ॥

"स्वस्तिपन्थामनुचरेम"

श्रीविरोधिकृत् सं॥
श्रावणकृष्ण द्वितीया । भानुवासरः
"महासदनम्"
नञ्जनगूडु
8—8—1971

इतिविद्वज्जनवशंवदः
राजा श्री गुरुराजाचार्यः
सञ्चालकः, प्रधानसम्पादकश्च

२०. गीतार्थसङ्ग्रहः (गीताविवृतिः)
२१. गीताभाष्यप्रमेयदीपिकाव्याख्या
२२. गीतातात्पर्यटीकाविवरणम्
२३. तन्त्रदीपिका
२४. न्यायमुक्तावलिः
२५. अणुभाष्यटीका तत्त्वमञ्जरी
२६. सूत्रभाष्यतत्वप्रकाशिकाभावदीपः
२७. श्रीमदनुव्याख्यानन्यायसुधापरिमलः
२८-३७. दशप्रकरणटीकाव्याख्याः
३८. श्रीरामचारित्रमञ्जरी
३९. श्रीकृष्णचारित्रमञ्जरी
४०. श्रीमद्भारततात्पर्यनिर्णयभावसङ्ग्रहः
४१. वादावलीव्याख्या
४२. तत्त्वप्रकाशिकातात्पर्यचन्द्रिकाप्रकाशः
४३. तर्कताण्डवव्याख्या
४४. प्रमाणपद्धतिव्याख्या
४५. अणुमध्वविजयव्याख्या
४६. भाट्टसङ्ग्रहः
४७. प्रातःसङ्कल्पगद्यम्
४८. प्रमेयसङ्ग्रहः

वृन्दावप्रवेशः

स्वावतारपरिसमाप्तिदत्तचित्तः श्रीराघवेन्द्रगुरुसार्वभौमोऽसौ पूर्वं श्रीप्रह्लादावतारसमये स्वानुष्ठितयज्ञवेदिकासमलङ्कृते [1] कुधर-देवदिव्यरदनसम्भूततुङ्गभद्रातरङ्गिणीमङ्गलतरङ्गसम्पाविते श्रीमन्म-

1. ಮೊದಲು ಗಾಂಗೇಯಶಯ್ಯಜನು ಈ । ನದಿಯತೀರದಿ ಇಲ್ಲಿಯಾಗವ ।
ಮುದದಿ ರಚಿಸಿಪೂರೈಸಿಪೋಗಿರ । ಲದನು ತವೊಳುತಿಹುದು...॥
—ಶ್ರೀ ಜಗನ್ನಾಥದಾಸರು

न्त्रालक्षेत्रे सप्तशतवर्षकालं सुन्दरवृन्दावनान्तर्गतस्सन् शरणगत-भक्तजन वृन्दावनाय भक्तजनयथायोग्यंदृश्यादृश्यरूपतया विराजितः लोककल्याणंचिकीर्षुः तदर्थं स्वमहिम्ना स्वायत्तीकृतमन्त्रालयग्रामः प्रह्लादावतारकालीनस्वकुलदेवतां साक्षाद्दुर्गारूपां श्रीमन्त्रालयाम्बिकां प्रार्थनया साक्षात्कृत्य, प्रसन्नया तया स्वनिवासभूमिं तपश्चरणवरञ्च लब्ध्वा, पितृवाक्यपरिपालनरतस्य दण्डकारण्ये सञ्चरमाणस्य देवदेवस्य श्रीरामचन्द्रप्रभोः पादपद्मसंस्पर्शपवित्रीकृतेन, नव्येन्द्रोपलेन निर्मापितस्वीयबृन्दावनः, मङ्गलमुहूर्ते निजपूर्वाश्रमीयज्येष्ठभ्रातुः श्रीगुरुराजाचार्यस्य पौत्राय, नैजसन्निधौ समधिगतसमस्तशास्त्राय, अत एव प्रकाण्डपण्डिताय श्रीवेङ्कण्णाचार्यशर्मणे सानन्दवितीर्णपरमहंसाश्रमः, निर्वर्तितमन्त्रमुद्राधारणगुरूपदेशः, संवर्तितश्रीसर्वज्ञविद्यासाम्राज्यपट्टाभिषेकः, अनुगृहीत "श्रीमद्योगीन्द्रतीर्था"भिधानः, अमन्दानन्दमविन्दत॥

तदनु श्रीशके १५९३ तमे विरोधिकृत्संवत्सरे * श्रावणकृष्णद्वितीयायां कवेर्वासरे सङ्कल्पितस्वीयवृन्दावनप्रवेशः प्रियवरकुमाराय श्रीयोगीन्द्रतीर्थगुरवे समर्पितमहासंस्थानाधिपत्यः, निर्वर्तितजपतपाद्यनुष्ठानः निजपूर्वाश्रमीयबन्धुषु पुत्रपौत्रप्रपौत्रेषु-श्रीलक्ष्मीनारायणाचार्य – पुरुषोत्तमाचार्य– बालकश्रीनिवासाचार्य ※ प्रभृतिषु निजगुरुविरहासहमानसेषु, परिखिद्यमानेषु ; तदर्थसम्मिलतपौरजनपदेषु ; अथ सकलाशामुखमुखरितेषु मङ्गलवाद्येषु, सन्ततसंस्तूयमानस्वस्त्ययन – विविधविजयबिरुदावलीसमेधितसरसकवितानिचयेषु विबुधवरेषु, गुरुस्तवनभजन–नर्तनपरेषु भागवतेषु, तद्दर्शनजनितपुलकोद्गमेषु सर्वजनेषु सभक्त्यावेगं प्रदीयमानहस्तलाघवेषु श्रीयोगीन्द्रतीर्थेषु, भक्त्यतिशयप्रणम्य-

* 1671 A. D.

※ भावि श्रीवादीन्द्रतीर्थश्रीमच्चरणः ।

मानशिरस्सु वेङ्कण्णपन्तप्रमुखसचिवसामन्त – सन्ततिषु कर-कमलद्वंद्वविलसितदण्डकमण्डलुः स किल गुरुपुङ्गवः, सकरुण-मन्दहासविलसितमुखारविन्दसन्दृष्टवन्दारुजनसन्दोहः, निजौदार्यलघीकृतनाकिनायकचिन्तामणिः, शरणजनमन्दारः अलङ्कृताभय-वरदमुद्रः, प्रतिपदमुपदिश्यमानरमारमणसर्वोत्तमतत्त्वः, सर्वजनेषु पश्यत्सु सत्सु सशरीरं वृन्दावनान्तर्गतः योगासने सन्निषण्णः, निजहृदयपुण्डरीकसंस्थापितपुण्डरीकाक्षः धृतारुणवसनः करधृत-जपमालः, द्वादशादित्यसदृशसंशोभितद्वादशोर्ध्वपुण्ड्रचारुविग्रहः, नारायणमन्त्रपरायणः, निमीलितार्धनयनः, प्रणवोच्चरणपूर्वकं स्वशिरसि स्वाज्ञाविन्यासितानेकशालग्रामः, परममङ्गलमूर्तिः श्रीमद्राजाधिराजराघवेन्द्रगुरुसार्वभौमः, जनदर्शनविदूरोऽपि निज-भक्तदर्शनादूरः सुन्दरवृन्दावनमधिष्ठायाप्यात्मसहृन्मन्दिरे विल-सन्नद्यापि विद्योतते ॥

श्रीमद्योगीन्द्रतीर्थश्रीमच्चरणः श्रीराघवेन्द्रगुरुसशरीरवृन्दावन-प्रवेशानन्तरं शिरसाधृतनिजदेशिकादेशः, ससम्भ्रमसमनुष्ठित-स्वगुरुवृन्दावनप्रतिष्ठः, तस्मिन्नेव हि मङ्गलदिने समाचरितस्वगुरु-महासमाराधनः, व्यवस्थापितनिजगुरुवृन्दावनसन्निधिपूजाविशेषः, जगत्कल्याणचिकीर्षुः श्रीमन्मध्वाचार्यवेदान्तविद्यासिंहासनाधि-रूढः चिरमवर्धत ॥

पुण्यपीयूषपूर्णश्रीगुरुराघवेन्द्रसशरीरवृन्दावनप्रवेशवर्षमारभ्य ऐषमः पर्यन्तं त्रिशतं समाः व्यतीयुः । महामहिम्नः यतिवरस्य त्रिशताब्दीयपुण्दिनेऽस्मिन् श्रीगुरुवराणां त्रिशतमानमहोत्सवः निखिलभारते सभक्तिश्रद्धं सवैभवं समनुष्ठीयमानो राजते ॥

विदितपूर्वमिदं समेषां सुजनानां यच्छ्रीमद्राघवेन्द्रगुरुवर-मठाधीश्वराणां ज्ञानभक्तिवैराग्यतपोनुष्ठानप्रथितयशसां श्रीमन्त्रा-लयविलसितसुन्दरवृन्दावनमन्दिराणां स्वभक्तवृन्दावनासक्तानां प्रातःस्मरणीयानां परमपूज्यश्रीमत्सुयमीन्द्रतीर्थश्रीमच्चरणानामा-

ज्ञानुसारेण १९४५ तमे क्रिस्ताब्दे गरलनगरे (नञ्जनगूडु) श्रीपरिमलसंशोधनप्रकाशनमन्दिरमस्थापीति ॥

श्रीमदाचार्यपरम्परागतानां प्राचीनाचार्याणां वेद-वेदान्त-न्याय-मीमांसा-व्याकरण-काव्य-नाटकालङ्कारादि प्रबन्धप्रवराणां सङ्ग्रह-संशोधन-सम्पादन-प्रकाशनादिकार्यं यशस्वितया निर्वहतोऽस्य प्रकाशनमन्दिरस्य रजतोत्सवं श्रीगुरुसार्वभौमत्रिशतमानोत्सवेन सममिदानीमस्माभिस्ससम्भ्रमं समनुष्ठातुं मोमुदीत्यस्माकं चेतः ।

महदिदं प्रमोदस्थानं नः यच्छ्रीमत्परमहंसेत्याद्यमन्दविरुदवृन्दभूषितानां श्रीमन्व्यासराजगुरुसार्वभौमानां कर्णाटकविद्यासिंहासनाधीश्वराणांश्रीमद्विद्यापयोनिधितीर्थश्रीपादानामाध्यक्ष्येऽस्मिन्नेव हि त्रिशतमानमहोत्सव-रजतोत्सवमङ्गलप्रसङ्गे कतिपयकाव्यशास्त्रादिग्रन्थानां तथा 'परिमल' सांस्कृतिक - धार्मिक-मासपत्रिकाविशेषसञ्चिकायाश्च प्रकाशनमद्य श्रीमच्चरणानाममृतहस्तेन निर्वर्त्येत इति ।

सकृत्पारायणमात्रेण ऐहिकामुष्मिकफलप्रदस्यास्य प्रबन्धस्य तद्व्याख्यानानुसारविरचितस्य कर्णाटकभाषानुवादरूपस्य च ग्रन्थस्य प्रकाशोऽप्यधुना विबुधसन्दोहसन्तुष्टये सानन्दं सोपस्करं क्रियत इति निवेदयितुं मोमुदीत्यस्माकं चेतः ।

अस्य ग्रन्थस्य पठन-पाठन-पारायणादिना सज्जनाः श्रीगुरुसार्वभौमपरमानुग्रहपात्रीभूताभवेयुरित्याशास्य विरमामः ॥

" स्वस्तिपन्थामनुचरेम "

श्रीविरोधिकृत् सं॥
श्रावणकृष्ण द्वितीया । भानुवासरः
" महासदनम् "
नञ्जनगूडु
8—8—1971

इतिविद्वज्जनवशंवदः
राजा श्री गुरुराजाचार्यः
सञ्चालकः, प्रधानसम्पादकश्च

॥ प्रमेयसंग्रहः ॥

॥ श्रीराघवेन्द्रयतिविरचितः ॥

॥ श्रीराघवेन्द्राय नमः ॥ निर्दोषानन्तकल्याणगुणपूर्णो नारायणः स्वस्वावतारैस्तथा अंशरूपैर्गजतुरगशरीरस्थैः तदाकार रूपैरेकीभूतः स्वसंहृतचेतनाचेतनात्मकं जगत् स्वोदरे तारतम्येन निवेश्य प्रकृत्यात्मकप्रलयोदकस्थश्रीरूपवटपत्रोपरि शिशुरूपी सन् ब्रह्मायुःपरिमितकालं योगनिद्रया शेते । स चास्योपचारतो निमेषमात्रम् । तदाऽव्याकृताकाशकालमूलजडप्रकृत्येकपञ्चाशद्वर्णादयो अनादिनित्यपदार्थाः व्याप्ततया वर्तन्ते । ततो ब्रह्मायुरष्टमांश काले सर्ववेदाभिमानिन्या रमया सृष्टचर्थं असंख्यातवेदैः संस्तुतः स्वामी सर्वदा अवाप्तसर्वकामत्वेन प्राप्तव्यप्रयोजनाभावेऽपि केवलं लीलया रमायाश्च पुत्रादिलक्षणमहदैश्वर्यं दातुं, तथा ब्रह्मादि सकलभक्ता[1]तिवात्सल्यतया सात्विकादित्रिविधजीवराशीनां अनादिकर्मस्वरूपलक्षणयोग्यतानुसारेणैतान् सृजामीति इच्छतीति । तदा हरेर्नाभ्यधो देशेऽप्राप्ततमसः प्राप्तव्यतमसश्चेति द्विविधास्तमोयोग्याः वर्तन्ते । तथा नाभिसमभागे अप्राप्तलिङ्गभङ्गा नित्यसंसारिणस्तिष्ठन्ति । तथा तन्नाभ्युपरि[2]स्तनप्रदेशे प्राप्तस्वरूपानन्दाः प्राप्तव्यस्वरूपानन्दाः इति द्विविधा मुक्तियोग्याः संन्ति । एवं पंचविधा जीवराशयो मुक्तियोग्यास्तमोयोग्या नित्यसंसारिण इति त्रिविधा गीयन्ते । स एव हरिरुक्तप्रकारेण स्वाश्रितानेतान् जडप्रकृत्या सह गृहीत्वा स्रष्टुमुद्युक्तः सन् आदौ पुरुषरूपेणावतीर्य

---

[1]भक्तवात्सल्यतया [2]तन्नाभ्युपरिप्रदेशे

तदानीन्तनं दुर्गात्मकं तमःपीत्वा देवर्षिपितृपनरा इति मुक्तास्तु पंचधेति[1] प्रमाणानुसारेण सिद्धसर्वजीवोत्तमब्रम्हादिसर्वजीवानां मुक्ति दातुं वासुदेवनाम्ना मायाख्यश्रीरूपया सहावततार । तदा माया देहस्थस्वेदोदकेन मुक्तियोग्यजीवावरकानादिषोडशकलात्मकलिङ्गदेहध्वंसकारणीभूतप्रधानविरजानदी जाता। स सृष्टयर्थं प्रकृत्याख्यया श्रिया सह प्रद्युम्न इत्यवततार। ततः स संहारार्थं जयाख्यया श्रिया सह संकर्षण इत्यवततार । स स्थित्यर्थं शान्त्याख्यया श्रिया सह अनिरुद्ध इत्यवततार ॥

॥ इत्यवतारचतुष्टयम् ॥

ततःसूक्ष्मसृष्टिप्रकारः – वासुदेवान्मायायां पुरुषनामा जातः । सङ्कर्षणाज्जयायां सूत्रनामा वायुर्जातः । प्रद्युम्नात्प्रकृत्यां प्रधानसंज्ञा सरस्वती, श्रद्धा संज्ञा भारती च जातेति । ततः पुरुषनाम्नो ब्रह्मणः प्रधानसंज्ञायां सरस्वत्यां शेषनामक जीवो जातः । सूत्र नाम्नो वायोः श्रद्धासंज्ञायां भारत्यां कालनाम गरुड उत्पन्नः ॥ इत्यादिप्रकारेण उत्तमद्वारा सृष्टा देवाश्चतुर्वर्णाः भवन्ति । ब्रह्मा ब्राह्मणः । वायुशेषगरुडरुद्रेन्द्रकामवरुणसूर्यचन्द्रयमादयो देवाः क्षत्रियाः । विवस्वानिति सूर्यमृते अन्ये सूर्याः, चन्द्रवरुणोपेन्द्रानृते अन्ये अदितिपुत्राः, मुख्यरुद्रमृते अन्ये रुद्राः, मुख्यप्राणमृते अन्ये मरुतः, अग्निमृते अन्ये[2] वसव इत्यादयो वैश्याः । अश्विनीपृथ्वीकाल मृत्युनिर्ऋत्यादिदेवाः शूद्राः । अत्र सूक्ष्मसृष्टिरित्युक्तषोडश कलात्मकानादिलिङ्गशरीरस्यैवोपचयविशेष इति केषांचित्पक्षः । सूक्ष्मजडप्रकृतिगुणत्रयं महत्तत्वादिनोत्पन्नेभ्यो अवराणां सूक्ष्म

---

1 चवोक्त प्रमाण । 2 अष्ट ।

शरीराणि कवचादुपरितनकवचान्तरवदेकस्यैकैकमेकीभूय सन्तीत्यन्यः पक्षः[1]। एवं सूक्ष्मतया सृष्टजीवान् प्रद्युम्नो देवतावत्सर सहस्रोपरि तेषां स्थूलदेहं दातुं अनिरुद्धहस्ते दत्तवान्। सोऽनिरुद्धस्तान् गृहीत्वा स्वस्त्रीभूतशांत्युदरे निवेश्य गुणत्रयेण स्थूल देहयुक्तानकरोत्। स्थूलदेहोपादानं गुणत्रयम् ॥

॥ गुणत्रयसृष्टिप्रकारः ॥

शांतिदेव्यभिमन्यमानाव्यक्ततत्त्वे सूक्ष्मपरमाणुरूपतया सत्व रजस्तमोगुणमिश्रीभूतानन्तानन्तराश्यात्मकमूलजडप्रकृत्या अनिरुद्धः प्रथमतः[2] सत्वराशिमनन्तरं रजोराशिं ततस्तमोराशिं गृहीत्वा सृजति । एतत् गणनाप्रकारः । नीचक्रमेणैकभागस्तमोराशिः । एतद्द्विगुणो रजोराशिः । एतद्द्विगुणः सत्वराशिः । एतद्राशित्रयमध्ये सत्वराशिः रजस्तमोभ्यां अमिश्रीभूतो यावान् तावान् सर्वोऽपि शुद्धसत्वमिति ॥ तमोराशिमध्येऽपि प्रकारत्रयम्। तथाहि–एकभागं रजः तद्दशांशं तमः, तद्दशांशं सत्वमिति ॥ रजोराशेरपि प्रकारत्रयम्। एकभागं तमः तच्छतांशाधिकं रजः, तच्छतांशाधिकं सत्वमिति एकैकस्य राशेः प्रकारत्रयम्। तदेकप्रकारमध्येऽपि प्रकारत्रयमित्येवं तमोगुणो नव प्रकारः॥ तथाहि-- एकभागरजोगुणमध्ये प्रकारत्रयम्। रजस्तमः, रजोरजः, रजःसत्वम्। रजोदशभागतमसश्चापि प्रकारत्रयम्। तमस्तमः, तमोरजः[3]तमस्सत्वम्। तमो दशभागसत्वस्यापि

---

[1]अयं पक्षः क पुस्तके वर्तते। अ पुस्तके नास्ति. [2]अ. प्रथमं।
[3]अ. रजःस्तमः सत्वतमः

प्रकारत्रयम् । [1]सत्वतमःसत्वरजः सत्वसत्वमिति नवप्रकारः ।। तथा रजोगुणोऽपि नवप्रकारः । एकभागतमः प्रकारत्रयम् । तमस्तमः तमोरजः तमस्सत्वम् । तमश्शताधिकरजसोऽपि प्रकारत्रयं । रजस्तमः रजोरजः रजस्सत्वमिति ।। रजश्शताधिकसत्वमपि प्रकारत्रयवत् । सत्वतमः सत्वरजः सत्वसत्वमिति । रजोमिश्रतमोराशिः सृष्टिकारणं भवति । शुद्धसत्वराशिः सृष्टिकारणं न, किन्तु मुक्तानां भोगसाधनभूतदेहोपादानकारणं भवति । तथा शुद्धतमोऽपि न सृष्टिकारणम् । किन्तु –

. . . . दैत्यरक्षः पिशाचकाः ।।
मर्त्याधमाश्चतुर्धैव तमोयोग्याः प्रकीर्तिताः ।।

इति प्रमाणसिद्धतमसि पतितानां चतुर्विधजीवानां दुःखभोगशरीराणामुपादानं भवति । सृष्टिकाले सत्वरजस्तमोराशीनां विषमावस्था कथमित्युक्ते एकस्मिन् राशावेकस्य प्रवेशेनैव पृथक् पृथगवस्थानमेव विषमावस्थेत्युच्यते । तथा महाप्रलये साम्यावस्था कथमित्युक्ते रजोराशिमध्ये रजस्सत्वम् । एतन्मध्ये एकादश भागो महत्तत्वस्य पतितोऽस्ति । तन्महत्तत्वनाशानंतरं स्वराशावागत्य सम्बध्यैव परस्परं दशभागेन[2]गत्वा शुद्धसत्वराशिमध्ये सम्बध्यते । उर्वरितैकभागः तमोराशिमध्ये गत्वा युज्यते । एवमेकैकस्मिन् राशावेकैकस्य प्रवेशो भवतीति कृत्वा संहारकाले साम्यावस्थेत्युच्यते ।।

---

1 अ. तमस्तमः तमोरजः तमः सत्वं । तमो दशभागसत्वस्यापिप्र कारत्रयं तमस्तमः तमोरजः तमःशताधिक रजसोऽपि प्रकारत्रयं । रजस्तमः रजोरजः सत्वमिति । रज शताधिकसत्वमपि प्रकारत्रयवत् । [2]क. भागेनैवं ।

अत्रेयं शङ्का— यदुक्तं तृतीयस्कंधादौ सृष्टिकाले गुणत्रय-कथनावसरे तमोराशिद्विगुणो रजोराशिः रजोराशिद्विगुणः सत्व राशिरिति । तथा तत्रैव बहिरावरणकथनावसरे अवारभ्य गुण-त्रयपर्यन्तं क्रमादेकैकस्यापेक्षया एकैकं दशभागाधिकमिति । तथा च गुणत्रयस्यापि एकापेक्षयैकस्य क्रमाद्दशभागाधिक्यमित्यायातम् । तथा च तदेतत्पूर्वोत्तरविरुद्धमिति ॥

तत्रेदमुत्तरम्—यदुक्तं सृष्टिकाले [1]गुणत्रयमेकापेक्षया द्वि-गुणमिति तत्सत्यमेव । इतः परं यदावरणकथनावसरे अवादि-गुणत्रयस्याप्येकैकस्य [2]दशभागाधिक्यमिति तन्न युक्तं । यथा अवा-दिकं पृथक् पृथगावरणमेवं सत्वादिकं न पृथगावरणं किन्तु [3]गुण त्रयमिलितमेकमेवावरणमिति वक्तव्यम् । तथा च ब्रह्माण्डलिप्तां[4] पृथिवीं विना आपस्तेजो, वायुः, आकाशः, अहङ्कारतत्वं, महत्तत्वं गुणत्रयं, एवं सप्तावरणं । एवं च गुणत्रयस्यैकैकस्य द्विगुणाधिक्यं त्रयाणां महत्तत्वापेक्षया दशाधिक्यं[5] च युज्यते इति ।

अत्रापीयमाशङ्का :— यद्येवं सप्तावरणस्वीकारः[6] तर्हि दशमस्कन्धे यशोदादेवी श्रीकृष्णमुखमध्ये नवावरणं जगद्दर्शे-त्युच्यते तथा च तद्विरोध इति ॥

अत्रेदमुत्तरम् :— उपादानभेदभिन्नगुणत्रयविकृता कृष्ण रक्तश्वेतरूपवती भूमिर्यशोदादृष्टेर्भिन्नतया गोचरासीदिति तत्र

---

[1]अ. गुणत्रयमेकापेक्षद्विगुणाधिकमिति । [2]अ दशभागाधिक्यमागतमिति ।
[3] क. गुणमिलितमेकमेवा । [4]क ब्रम्हाण्डलिप्तपृथिवी ।
[5]क. दशगुणाधिक्यं युज्यते । [6] क. सप्तावरणस्याकारः ।

नत्रावरणकथनम् । वस्तुतस्तु गणनविषये सर्वप्रमाणवाक्यैरावरण सप्तकमेव सिद्धमिति द्रष्टव्यम् ॥

इतः परं गुणत्रयसृष्टिप्रकारस्त्वित्थम् :– रजोराशिमध्यस्थ-रजस्सत्वं महाप्रलयकाले महत्तत्वसंहारानन्तरं शुद्धसत्वान्तःप्रविश्य मानं दशभागरजस्सत्वम् । तथा तमोराश्यन्तःप्रविश्यमानैकभाग रजस्सत्वं पुनः स्वराशिभूतरजोराश्यन्तस्थैकभागरजस्सत्वमिति द्वादशभागरजः सत्वं, पुनस्तमोराश्यन्तस्थैकभागं तम इति त्रयोदश भागेन महत्तत्वसृष्टिः[1] । क्रोडीकारेण महत्तत्वान्तःप्रविष्टगुणानां प्रकारस्त्वित्थम्– एकभागं तमः, एतच्छतभागं रजः, एतच्छतभागं सत्वं । एवमेको गुणो भागत्रयात्मकः । एवम्भूतपदार्थानां यावती सृष्टिः तावत्पर्यन्तं तदुपादानभूतगुणत्रयाणां प्रकारत्रयं द्रष्टव्यम् । एतादृशमहत्तत्वं ब्रह्मणः शरीरम् । एतस्याभिमानी पुरुषनामा ब्रह्मा । ब्रह्मणःस्थूलदेहेनोत्पन्नसूत्रनामा वायुरपि महत्तत्वाभिमानी । महत्तत्वस्य सत्वप्राचुर्यमस्तीति हेतोर्ब्रह्मा सत्वसत्वाधिक इति गीयते ॥

अत्रेवं[2] शङ्का :---- शुद्धसत्वराश्यन्तस्थसत्वं पतितमस्ति किल । तथा [3]रजस्तमोराश्यन्तस्थसत्वमपि पतितमस्ति किल । रजोगुणेन निर्मितमस्तीति सत्वसत्वाधिक्यं कथमित्युक्ते रजोरा-श्यन्तस्थरजोगुणस्य रजस्थसत्वं[4] पतितमस्ति । तमो रजोगुणा-पेक्षया रजस्सत्वस्य सत्वप्राचुर्यमस्तीति हेतोर्ब्रह्मा सत्वसत्वाधिक इति गीयते ॥

---

[1]क. महत्तत्वक्रोडीकारेण । [2]क. अत्रेयं शंका ।
[3]क. तमोराश्यन्तस्थ. [4] क. रजः सत्वं ।

तथा सरस्वती भारती[1]च स्थूलदेहेन अव्यक्ततत्वस्याभिमानिन्यौ सत्यौ स्वपतिसमीपे स्तः। तयोर्मध्ये गायत्री, सावित्री, सरस्वती इति त्रिरूपाऽऽसीत्। तदुपरि पुरुषनामा ब्रम्हा त्रिरूपासु देवीषु वीर्यमाधाय पुनस्तद्वीर्यमेकीकृत्य गायत्र्युदरे निवेश्य तस्माद् ब्रह्मा स्वयं पुनःवायुश्च व्यक्तौ जातौ। एतादृशमहत्तत्वादहङ्कारतत्त्वमजायत। तदहङ्कारतत्त्वस्यैकांशं तमः, तद्दशांशाधिकं रजः, तद्दशांशाधिकं सत्वम्ः तमःप्राचुर्यादहंकार इति गीयते॥

एतादृशाहङ्कारतत्त्वस्य अभिमानिनां वैकारिकतैजसतामसरुद्राणां[2]सृष्टिप्रकारस्त्वित्थम्:- महत्तत्वाभिमानी ब्रम्हा महत्तत्वान्तस्थसत्वांशेन सरस्वतीद्वारा वैकारिकरुद्रमुत्पादयामास। तथा महत्तत्वाभिमानी वायुरपि महत्तत्वान्तस्थरजोंशेन भारतीद्वारा तैजसरुद्रमुत्पादितवान्। तथा महत्तत्त्वाभिमानी जीवनामकशेषं, कालनामकगरुडं चोत्पादयामास। अयं जीवनामकशेषो महत्तत्वान्तस्थतमोंशेन स्वस्त्रीद्वारा तामसहङ्काररुद्रं जनयामास। तथेन्द्रमित्रसमानदेवानुत्पादयामास। एतादृशाहङ्कारतत्त्वाद्वैकारिकरुद्रः स्वस्त्री द्वारा मनस्तत्त्वं दशेन्द्रियाभिमानिनो देवानुत्पादयामास॥

तत्प्रकारस्त्वित्थम्:- श्रोत्राभिमानिन्यो दिग्देवताः (१) त्वगभिमानी प्राणः (२) चक्षुरभिमानी सूर्यः (३) जिह्वाभिमानी वरुणः (४) घ्राणाभिमानिनावश्विनौ (५) वागभिमानी वह्निः (६) पाण्यभिमानी दक्षः (७) पादाभिमानी जयन्तः (८) पायु-

---

१ अ. सरस्वतीभारत्यौ च

२ क. वैकारिकतैजसतामसरूपाणां

भिमानी मित्रः (९) उपस्थाभिमानी मनुः (१०) एकादशैते वैकारिकरुद्रेण सृष्टाः । तथा तैजसरुद्रः स्वस्त्रीद्वारा जडानि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणेति पंच ज्ञानेन्द्रियाणि, तथा वाक्पाणिपादपायूपस्था इति पञ्च कर्नेन्द्रियाणि, जनयामास । तथा तामसाहङ्कार रुद्रः स्वस्त्रीभूतोमाद्वारा शव्दस्पर्शरूपरसगन्धा इति पञ्च तन्मात्राणि च तथा आकाशवायुतेजोऽप्पृथिव्य इति पचभूतानि जनयामास । एतेषु नारायणरूपाणि पृथिव्यप्तेजस्सु अन्नमयरूपं, तेजोवाय्वाकाशेषु प्राणमयरूपं अहंङ्कारतत्त्वे, मनोमयरूपं, महत्तत्त्वे विज्ञानमयरूपं, गुणत्रयलक्षणाव्यक्ततत्त्वे च आनन्दमय रूपमित्येकः पक्षः । एषु तत्त्वेषु ब्रम्हणो अन्नमयादयः कोशाः इति पक्षान्तरं । ततो वायोरपि गरुडशेषेन्द्रादयो देवाः प्रत्येकमुत्तमदेवेभ्यो नीचदेवाः बहिस्सृष्टौ यावन्तः उत्पत्स्यमानास्तावन्तस्तारतम्येन उत्पन्नाः । ततो मायादेवी श्रीभूदुर्गेति त्रिरूपासीत् । तदा श्रीवासुदेवः श्रीरूपया साकं क्रीडां कृत्वा स्वयमेव विष्णुरित्यवतीर्य ब्रम्हाण्डान्तः सर्वेषां स्थितिकर्ता बभूव । पुनः स एव वासुदेवः भूरूपया विक्रीडय स्वयमेव ब्रम्हनामको भूत्वावतीर्य ब्रम्हाण्डान्तस्थचतुर्मुख ब्रम्हणि स्थित्वा सृष्टिं करोति । तथा स एव वासुदेवः दुर्गारूपया तया सह विक्रीडय तस्यां स्वयमेव रुद्रनामा सन्नवतीर्य ब्रम्हाण्डान्तस्थोमापतिलक्षणे रुद्रे स्थित्वा सर्वं संहरति । इति प्रकारान्तरेण बहिस्सृष्टिरासीत् ॥

ततो ब्रम्हाण्डस्थितिरित्थम् :– विष्णुः श्रीदेव्यां वीर्यमाधाय पूर्वोक्त चतुर्विंशतितत्त्वांशैरन्तरितस्ततः सर्वत्र पंचाशत् कोटिविस्तारवत् तथा पंचाशत्कोटियोजनदलवत्सुवर्णतेजोमयं

कुक्कुटाण्डाकारेण ब्रम्हाण्डमुत्पाद्य तदन्तर्बहिश्च स्वयमेवाधारः सन् तथा अन्तर्बहिर्व्याप्तो भूत्वा तिष्ठति । ततो ब्रम्हाण्डान्तः आतानवितानात्मकं पुरुषरूपमुत्पाद्य तस्मिन् विराट् ब्रम्हाणं स्थापयित्वा तस्मिन् स्वामी स्वयमेव व्याप्तः सन् स्थित्वा चतुर्दशलोकानामाधाररूपी आस ॥

तत्प्रकारस्त्वित्थम् :– तस्य पादमूले पाताललोकः (१) तत्पार्ष्णिप्रदेशे रसातललोकः (२) तद्गुल्फप्रदेशे महातललोकः (३) तज्जङ्घाप्रदेशे तलातललोकः (४) तज्जानुप्रदेशे सुतललोकः । (५) तदूरुद्वयप्रदेशे वितललोकातललोकौ (६–७) तत्कटिप्रदेशे भूलोकः (८) तन्नाभिप्रदेशे नभोलक्षणभुवर्लोकः (९) तदुदरप्रदेशे ज्योतिर्लोकः (१०) तद्ग्रीवाप्रदेशे महर्लोकः (११) तन्मुखप्रदेशे जनोलोकः (१२) तल्ललाटप्रदेशे तपोलोकः (१३) तच्छिरोदेशे सत्यलोकः (१४) इत्याकारेण स्वामी चतुर्दश लोकानां पुरुषरूपेण व्याप्तःसन् "सहस्रशीर्षा पुरुषः" इत्यादिसूक्तः जातेन स्तुतः आधारत्वेन सिद्धः। तस्यैव विराट् ब्रह्मणः अवयवेभ्य-उत्पन्नाः सर्वे देवाः अहमधिकोऽस्मीति विवादमकुर्वन् । तदा नारायणचतुर्मुखौ मुख्यप्राणस्य तत्त्वाभिमानिसर्वदेवोत्तमत्वं [1]दर्शयितुं स्वस्वसामर्थ्यमाच्छाद्य तटस्थतया स्थितौ सन्तौ। तदा हि देवाः परस्परं विवदिपन्तः इत्थमवदन्- यदि सर्वेषामस्माकमेतद्विराट् शरीरनिर्गमे सति यन्निर्गमनादिदं शरीरं पतिष्यति पुनरस्माभिः प्रवेशे कृते यत्प्रवेशादुत्थास्यति स एव श्रेष्ठः इति प्रतिज्ञां कृत्वा

[1]क. युक्त्या दर्शयित्वा स्वस्वं

तथैव क्रमात्सर्वे तस्मान्निर्गताः। तेषु निर्गतेषु सत्सु प्राणनिर्गमनेनैव शरीरं पतितं, पुनस्तेषु प्रविष्टेषु सत्सु प्राणप्रवेशेनोत्थितं, दृष्ट्वा सर्वे ते प्राणमेवास्माकं मध्ये श्रेष्ठ इति स्तुत्वा पूजां चक्रुः ॥

॥ इति वैराजसृष्टिसंग्रहः ॥

॥ अथ पाद्मसृष्टिः ॥

ब्रह्माण्डे गर्भोदके स एव नारायणः सर्वावताराणां मूलांश-भूतपद्मनाभात्मकः सन् लक्ष्म्या सह शेषोपरि योगनिद्रां कुर्वति सति तदवसानकाले लक्ष्म्या स्तुतः सन् स्वनाभेः सकाशाच्चतुर्दश-भुवनात्मककमलमुत्पाद्य तत्कमलाच्चतुर्मुखं जनयामास । स ब्रह्मा उदकवायू दृष्ट्वा अतिभीतःसन् तत्कमलनालं प्रविश्य तत्रापि कमप्यदृष्ट्वा पुनरुपर्यागत्य स्थित्वा " तप " इत्यशरीरं वाक्यं श्रुत्वा देवतासहस्रवत्सरपर्यन्तं तपःकृत्वा चतुर्मुखैश्चतुरो वेदान् वक्ष्यमाणःसन् नारायणमस्तौत् ॥

॥ अथ कालप्रमाणम् ॥

बहिस्सृष्टिः पंचाशद्वत्सरः । अन्तःसृष्टिः पंचाशत्संवत्सर इति ब्रह्मणो वत्सरशतम् । अथवा बहिस्सृष्टिमारभ्याण्डसृष्टि-पर्यन्तं दिनद्वयन्यूनपंचाशद्वत्सरः। उर्वरितदिनद्वयमध्ये एकस्मिन् दिने वैराजसृष्टिः । अपरस्मिन् पाद्मसृष्टिः । तथा च बाह्यसृष्टि-मारभ्य पाद्मसृष्टिपर्यन्तं पंचाशद्वत्सरः । उर्वरितपञ्चाशद्वत्सरे जगत्सृष्टिरिति मिलित्वा ब्रह्मणो वत्सरशतमिति । यद्वा नारायणः चतुर्थे यामे उत्थितः सन् ब्रह्माण्डेन सह सकलबहिस्सृष्टिं कृत्वा

ब्रह्माण्डान्तःसृष्टिं ब्रह्मणो वत्सरशतपर्यन्तं करोतीति अतो द्विपरार्धात्मकं ब्रम्हायुरिति गीयते ॥

॥ अथ कालगणनम् ॥

मनुष्यमासः पितृदिनम् । मनुष्यवत्सरः देवानामेकदिनम् । मनुष्यवत्सराणां षष्ठयुत्तरशतत्रयं देवानामेको वत्सरः। मानुषत्रिचत्वारिंशल्लक्षविंशत्सहस्रवत्सरमिति देवानां द्वादशसहस्रवत्सरः। देवताद्वादशसहस्रवत्सरात्मकः कालः महायुगः ॥ एवं कृतादिचतुर्युगपरिमितकालः । तथाहि:–कृतयुगं चतुस्सहस्रवत्सरात्मकं। तत्सन्धिकालः अष्टशतात्मकः । त्रेतायुगं त्रिसहस्रवत्सरात्मकम् । तत्सन्धिकालः षट्शतात्मकः। द्वापरयुगं द्विसहस्रम्। तत्सन्धिकालः। चतुःशतात्मकः । कलियुगं तु एकसहस्रम् । तत्सन्धिकालश्च द्विशतात्मकः । इति सन्धिकालेन सह कलियुगं देवताद्वादशशतात्मकं । इदमेव मानुपमानेन द्वात्रिंशत्सहस्रसहितं लक्षचतुष्टयम् । एवं युगचतुष्टयं मनुष्यमानेन विंशत्सहस्राधिकत्रिचत्वारिंशल्लक्षवत्सरात्मकः कालः । अयमेव महायुगाख्यः कालः । एतादृशमहायुगसहस्रं ब्रम्हणो दिनम् । तथैव रात्रिश्च । ब्रम्हणो दिवसस्यैकस्य मनुष्यमानेन खर्वत्रयमेकनिर्बुदैकार्बुदं चत्वारिंशदुत्तरशतकोटिवत्सराः । एवं ब्रम्हणो वत्सरशतस्य मनुष्यमानेन महाक्षोहिणीत्रयम् अक्षौहिण्येकं महाखर्वैकं खर्वैकं निर्बुदचतुष्टयवत्सराः । एतावानेककालो नारायणस्य योगनिद्रारूपकः । ब्रम्हणः एतादृशे त्रिंशद्घटिकात्मके अहनि दशावताराः भवन्ति । तत्रादिभागे स्वायंभुवमन्वन्तरे श्वेतवराहावतारः। अन्येऽवताराश्चतुर्विंशन्महायुगे, केचन सप्तविंशन्महायुगे, अष्टाविंशन्महायुगे च । तथा चाक्षुषमन्वन्तरे,

वैवस्वतमन्वन्तरे च अवताराः भवंति । उर्वरितमन्वन्तरे च तत्तदुपासनविषयभूत नारायण एव उपदेशकर्ता ॥

॥ अथ तारतम्यम् ॥

अत्र ब्रम्हाण्डान्तःसृष्टिः प्रायस्तारतम्यज्ञापिका न । कुत इत्युक्ते, कालजयादिपार्षदा अन्तःसृष्टौ गरुडशेषोत्पन्ना बहिःसृष्टौ च स्वस्वस्थान एवोत्पन्ना इत्यतो बहिस्सृष्टिस्तारतम्यज्ञापिका न । अन्तःबहिःसृष्टो संकलय्य यथाप्रमाणं तारतम्यं संगृह्यते । आदौ जगज्जन्मादिकर्ता सच्चिदानन्दस्वरूपानन्तावतारात्मकत्वेनान्तानन्तवेदप्रतिपाद्यः श्रीलक्ष्मीनारायणः सर्वोत्तमः ततोऽव्यक्ततत्वाभिमानिनी । तथाऽनन्तावतारात्मिका ब्रम्हाद्यैश्वर्यप्रदात्री श्रीः नारायणादनन्तानन्तगुणैरवरा । ततो महत्तत्वाभिमानी ब्रम्हा, विज्ञानतत्वाभिमानी वायुश्चेमौ द्वौ परस्परं समानौ सन्तौ लक्ष्म्याः कोटिगुणाधमौ । अत्र वायुर्ब्रम्हपदं प्राप्यैव मुक्तो भवति । ततो वेदाभिमानिनीं सरस्वती, भक्त्यभिमानिनी भारती, च द्वे अपि समे स्वपत्यपेक्षया शतगुणाधमे । भारत्यपि सरस्वतीपदं प्राप्येव मुक्ता भवति । ततः कालाभिमानी गरुडः जीवाभिमानी शेषश्चेमौ अहङ्काराभिमानी रुद्रश्चेत्येते प्रायः समाः सन्तो भारत्याः शतगुणाधमाः । रुद्रोऽपि शेषपदं प्राप्यैव मुक्तो भवति । ततो जाम्बुवती, कालिन्दी, नीला, भद्रा, मित्रविन्दा, लक्षणा षडेताः नारायणस्त्रियः समाः । गरुडशेषापेक्षया स्वरूपतारतम्ये किंचिन्नीचाः ब्रम्हवाय्वपेक्षया पंचाशत्सहस्रगुणैःनीचाः । एतासा मध्ये जाम्बुवती किंचिदधिका । षडेतासु लक्ष्म्यावेशोऽस्ति । तत्रापि जाम्बुवत्यां विशेषावेशः सर्वदाऽस्ति । ततो गरुडस्त्री सौपर्णी, शेषपत्नी वारुणी

रुद्रस्त्री पार्वती जाम्बुवत्यपेक्षया द्विगुणनीचा । एयास्तिस्रः परस्परसमाः सत्यः स्वपतिभ्यः शतगुणाधमाः । अत्र पार्वती वारुणी पदं प्राप्यैव मुक्ता भवति । ततः ऐश्वर्याभिमानी इन्द्राः । अवैराग्याधिपतित्वे सति चक्राभिमानी कामश्चेमौ द्वौ समौ सन्तौ[1] वाय्वपेक्षया दशगुणनीचौ, चक्राभिमानी भरतश्चेन्द्रसमः । पार्वत्यादिभ्यः शतगुणाधमौ । अत्रापीन्द्रः किंचिदधिकः – – – – –णे क्षमः[2] । ततस्त्वगिन्द्रियाभिमान्यहङ्कारप्राणो देवेन्द्राद्दशगुणाधमः । ततःकाम पुत्रोऽनिरुद्धः । बृहस्पतिः । स्वायंभुवमनुः । दक्षप्रजेश्वरः । देवेन्द्रस्त्री शची, कामस्त्री रतिः षडेते समाः सन्तो अहङ्कारप्राणाद्दशगुणाधमाः । ततो भूतप्रवाहवायुः कामपुत्रादनिरुद्धात्पंचगुणाधमः । ततो यमधर्मः सूर्यश्चन्द्रः, स्वायंभुवमनुस्त्री शतरूपा एते चत्वारः समाः सन्तः प्रवहवायोः सकाशात् द्विगुणाधमाः । ततो वरुणो यमधर्मात्सार्धपादगुणाधमः । ततो नारदऋषि वरुणात् किंचिन्नीचः । ततोऽष्टवसूनां मध्ये अग्निरिति वसुः, भृगुऋषिः[3] दक्षप्रजेश्वरस्त्री प्रसूतिः एतं त्रयः समाः सन्तो नारदात्किंचिदवराः । वरुणात्पादगुणाधमाश्च । ततः कर्मजदेवानां मध्ये गणनीयः प्रल्हादो भृगोः सकाशात्किंचिन्नीचः । ततो मरीचिः । अत्रिः । अंगिराः पुलस्त्यः पुलहः क्रतुः वसिष्ठः विश्वामित्रः वैवस्वतमनुः नवैते परस्परं समाः सन्तो भृग्वादिभ्यः किंचिन्नीचाः । ततो द्वादशादित्यानां मध्ये मित्रनामा सूर्यः बृहस्पतिस्त्री तारा, अधर्माभिमानी कोणपो निर्ऋतिः प्रवाहवायोः स्त्री प्रवाही एताश्चत्वारः समाः सन्तो मरीच्यादिभ्यः

[1]क. वाय्वपेक्षया दशगुणनीचौ Is omitted here

[2]अ. अत्रापीन्द्रः किंचिदधिकः । ततस्त्वगिन्द्रियाभिमान्यहंकारप्राणो

[3]अ. भृगुऋषिः Is omitted

किञ्चिदवराः । भृग्वादिभ्यो द्विगुणाधमाश्च । ततः शतस्था देवाः आकाशाभिमानी गणेशः धनाभिमानी कुबेरः वायुपुत्रो विश्वक्सेनः एते पंच तथा अग्निःद्रोणः प्राणः ध्रुवः अर्कः वसुः विभावसुः द्युः- एते अष्ट वसवः तथा, अर्यमा पूषा त्वष्टा सविता भगः धाता- विवस्वान् वरुणः मित्रः शक्रः उरुक्रमः पर्जन्यः एते द्वादशादित्याः। ततो महारुद्रः । रैवतः अजः भवः भीमः वामः उग्रः वृषाकपिः अजैकपादहिर्बुध्निः बहुरूपी एते एकादश रुद्राः । ततो मरुतः अह- ङ्कारप्राणः शब्दाभिमानी प्राणः स्पर्शाभिमान्यपानः रूपाभिमानी व्यानः रसाभिमानी उदानः गंधाभिमानी समानः एवमेते षट् । प्रवहवायुः प्रतिभः सौम्यः कूर्मः नागः कृकलः देवदत्तः धनंजयः आवहः विवहः संवहः परिवहः उद्वहः एते त्रयोदश इत्यादयः एकोनपंचाश- न्मरुतः तथा पुरुरवाः आर्द्रवः धनुर्विलोचनः कामः कालः क्रतुः दक्षः सत्यः वसुः एते दश विश्वेदेवाः तथा वसुरुद्रादित्याः एते त्रयः पितरः, द्यावापृथिव्यौ द्वे एकः ऋभुगणः इत्यादयः शतस्थाः समाः सन्तो मित्रनामक सूर्यात्किंचिन्यूनाः । एतेषां मध्ये केषांचिदधि- कानां विवरणम् । अष्टवसुमध्ये अग्निनामा वसुः भृगुऋषिसमः । द्वादशादित्यानां मध्ये विवस्वानिति सूर्यः यमधर्मसमः । वरुणनामा सूर्यः शक्रनामा च उरुक्रमनामाऽऽदित्यो नारायणावतारः । मित्र- नामकादित्यो निरृतिसमः । एतेऽधिकाः पर्जन्यनामा सूर्यः सर्वावरः भागीरथीसमः । एकादश रुद्राणां मध्ये महानिति रुद्रः शेषसमः । मरुन्मध्ये अहङ्कारप्राणो देवेन्द्रादनंतरः। प्रवाहवायुः बृहस्पत्यनंतरः । तथा पंच प्राणाः किंचिदधिवाः । एषां शतस्थत्वं नाम सोमपानार्हत्वमेव । पादाभिमानी जयन्तः उक्तशेषसमाः ।।

अथ कर्मजदेवाः— अग्निपुत्रः पावकः च्यवनऋषिः उचथ्यऋषिः प्रल्हादः एते चत्वारः तथा स्वायंभुवः स्वारोचिषः उत्तमस्तापसः रैवतः चाक्षुषः वैवस्वतः सावर्णिःदक्षसावर्णिः ब्रम्हसावर्णिर्धर्मसावर्णिः रुद्रसावर्णिः देवसावर्णिरिन्द्रसावर्णिः एते चतुर्दशमनवः ततः चिरपितृमध्ये सप्त पितरः गन्धर्वाणां मध्ये अष्टौ गंधर्वाः। ततो यज्ञः रोचनः सत्यजित् त्रिशिखः विभुः [1]मन्द्रद्युम्नः पुरंदरः बलिः अद्भुतः विधृतः शंभूः सुधामा दिवस्पतिः शुचिः एते चतुर्दशेन्द्राः। अथ नवाधिकराज्ञां मध्ये नव राजानः। कार्तवीर्यः पृथुः चक्रवर्ती शशबिन्दुः प्रियव्रतः दौष्यन्तिर्भरतः त्रिजन्मभरतः ककुस्थः गयः मांधाता एते नव। एते षट्पंचाशत्कर्मजाःसमाः। एषां मध्ये केचनाधिकाः, । चतुर्दशमनुमध्ये तापसमनुः नारायणावतारः, वैवस्वतमनुः सप्तर्षिसमः। स्वायम्भुवमनुः बृहस्पतिसमः, प्रल्हादो भृगुऋषेः किंचिन्नीचः मरीचोत्तमश्च। चतुर्दशेन्द्रमध्ये यज्ञनामेन्द्रो नारायणावतारः रोचनो वाय्ववतारः सत्यजित् यमावतारः त्रिशिखो विभुश्विनोरवतारौ, मन्द्रद्युम्नः पुरन्दरश्चेमौ द्वौ देवेन्द्रावतारौ उर्वरितेन्द्राः उक्तकर्मजदेवाः। एवं सर्वे समा सन्तो अग्नेः शतगुणावराः। गणेशादिशतस्थापेक्षया किंचिन्नीचाः। ततो वरुणस्त्री भागीरथी, यमस्त्री श्यामला, सूर्यस्त्री संज्ञा, चन्द्रस्त्री रोहिणी, कामपुत्रानिरुद्धस्त्री उषादेवीः वृष्टयभिमानि पर्जन्यनामा सूर्यः षडेते समाः पावकादिकर्मजदेवेभ्यः किंचिदवराः। ततः केचिदनुक्ताः देवाः पर्जन्यादवराः। तथा अग्निस्त्री मंत्राभिमानिनी स्वाहादेवी पर्जन्याद्विगुणाधमा। ततः उदकाभिमानी बुधः नामाभिमानिनी उषादेवी च द्वे अप्यग्निस्त्रियौ अवरे। भूम्यभिमानी शनैश्चरः।

---

[1]अ. इन्द्रद्युम्नः पुरंदरः

उषायाः सकाशान्नीचः । तत पुष्करदेवता शनैश्वरादवरा । ततः आजानजदेवाः तुम्बुर्वाद्यष्टोत्तरशतदेवगंधर्वाणां मध्ये गंधर्वशतम्।। ततः उर्वशी, रम्भा, मेनका, तिलोत्तमा, पूर्वचित्तिः, घृताची, प्रम्लोचा, अम्लोचना कृतस्थली कृतादिसहस्राप्सर स्त्रियः। पूर्वोक्तसप्त ऋषीन् विना सर्वे ऋषयः शतोत्तरषोडशसहस्राग्निपुत्राः अजगरीभूतविद्याधरः उक्तदेवान् विना अनुक्तदेवाश्चेते समाः । एतेषामग्निपुत्राणां मध्ये करोर्वाह्नयात् किंचिदधिकाः । एते सर्वे पावकादिदेवेभ्यः शतगुणावराः । पुष्करादिभ्यः किंचिन्यूनाः। ततो देवगन्धर्वाः कर्मदेवतामध्ये उक्तशतसंख्याकान् तथा चिरपितृमध्ये अष्टौ च विना. अन्यचिरपितृभ्यः शतगुणनीचाः । ततो मनुष्यगन्धर्वाः देवगन्धर्वेभ्यः शतगुणाद्रमाः ततः क्षितिपा मनुष्यगन्धर्वेभ्य शतावराः । ततो मनुष्योत्तमाः क्षितिपेभ्यः शतगुणाधमाः ।। एतत्तारतम्य उत्तममारभ्य

सोपानारोहणन्यायेनोक्तप्रकारस्त्वित्थम् ।।

आदौ नारायणोऽनन्तगुणपरिपूर्णः तत लक्ष्मीरनन्तगुणाधमा । ततो ब्रम्हवायू कोटिगुणाधमौ । ततः सरस्वतीभारत्यौ शतगुणाधमे। ततो गरुडशेषरुद्राः शतगुणावराः ततः सौपर्णी वारुणी पार्वतीति तित्र शतगुणावराः। ततः इन्द्रकामौः शताधमौ ततो बृहस्पत्याद्यष्टकं, ततो अग्न्यादि, ततः कर्मदेवताः ततः आजानजदेवताः, ततश्चिरपितरः[1], ततोः, देवगंधर्वाः ततो मनुष्यगंधर्वाः, ततः क्षितिपाः, ततो मनुष्योत्तमाः शतावराः इति।

एभ्यो नीचानां गुणनियमो नास्ति – ततो ब्रम्हणा सृष्टा

---

[1]अ. ततश्चिरपितरः Not found (न कथ्यते)

किन्नराः किम्पुरुषाः विद्याधराः यक्षरक्षांसि यातुधानाः गुह्यकाः साध्याः सिद्धाः। तथा दानवाः भूतवेतालसर्पादिरक्षांसि खगमृगादि तिर्यग्योनयः क्रिमिकीटाद्यण्डजजरायुजस्वेदजोद्भिज्जाः इति चतुर्विधजन्तवः । एवं मुक्तियोग्यतमोयोग्यनित्यसंसारिणः इति राशित्वेन त्रिविधाः असंख्याताः जीवाः।

केचित्तु — अष्टाशीतिश्चत्वार्यशीतियोनिद्वारा कर्मानुसारेण सृज्याः । एतान् ब्रम्हा स्वावयवेभ्यः स्वायंभुवमनुमरीच्यादिभ्यो मिथुनीभावेन नानाप्रकारेणोत्पाद्य मध्ये नारायणं स्तुवन् तिष्ठति ।।

।। अथ दशावताराः ।।

स्वायंभुवमन्वन्तरे मधुकैटभयोर्मेदेन मेदसा घनीभूता भूः स्वयमेव गर्भोदके मज्जति सति जगदर्थं ब्रम्हा स्वायंभुवमनुना सह पद्मनाभस्तोत्रं कृतवान् । तेन स्तुतः स्वामी स्वांशेन ब्रह्मनासापुटात् श्वेतवराहावतारं कृत्वा भूम्युद्धारं कुर्वन् ब्रम्होत्पन्नादि हिरण्याक्षेणावरुद्धः सन् तं स्वदन्तेन विदार्य भूमिमानीय दत्तवान् । ततस्तेन कोपेन दितिपुत्रहिरण्याक्षः सनकादिशापहतेन[1] जयेन सहोत्पन्नः सन् ब्रम्हवरादजेयत्वं प्राप्य भूमिं मज्जति । अयमेव महावराहभूतः स्वामी पुनः भूम्युद्धारं कुर्वन् हिरण्याक्षावरुद्धः सन् तं दैत्यं कर्णताडनेन हत्वा भूम्युद्धारं कृतवान् ।।

[1]अ. सनकादिशापितः तेन जयेन सह

।। अथ भूविस्तारः ।।

सप्तद्वीपमध्ये वलयाकारतया लक्षयोजनायामो जम्बुद्वीप.। तन्मध्ये नव खण्डाः। तेषां मध्ये इलावृतखंडश्च[1] चतुरस्रं चतुस्त्रिंशत्सहस्रयोजनात्मकः। तन्मध्ये लक्षयोजनोच्छ्रितः सुवर्णमयमेरुपर्वतः। सोपि भूम्यन्तः षोडशसहस्रयोजनपरिमितः प्रविष्टोऽस्ति । सोपि कनकपुष्पाकारेण चतुर्दिक्षु द्वात्रिंशत्सहस्रयोजनायामः । [2]उर्वरितचतुरस्रस्त्रिसहस्रयोजनायामः भूमेरुपर्यस्ति। सोपि कनकपुष्पाकारेण अधोभागे चतुरस्रेण षोडशसहस्रयोजनायामः । उपर्यष्टदलाकारेण चतुर्दिक्षु द्वात्रिंशत्सहस्रयोजनायामः । तदुपरि तन्मध्यभागे चतुरस्रं दशसहस्रपरिमितप्रदेशे ब्रम्हसभास्थानम् । तस्याष्टभागेषु अष्टौ सहस्रयोजनप्रदेशानन्तरे अष्ट दिक्पालकानां गृहाणि सार्धद्विसहस्र योजनायामतया सन्ति । एष तद्गृहाणां पृष्ठभागे मेरोरग्रस्य सर्वत्र पञ्चाशद्योजनायामप्रदेशो उर्वरितोऽस्ति । तदन्तपूर्वाद्यष्टदिक्षु ।

इन्द्रो वन्हिः पितृपतिः नैऋतो वरुणो मरुत् ।
कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात् ।।

ततः श्रीविष्णोः प्रतिमाभूतस्य मेरोश्च पूर्वादिचतुर्दिक्षु कुलपर्वताः। पूर्वभागे मन्दरः, मेरोर्दक्षिणभागे मेरुमन्दरः। मेरोः पश्चिम भागे सुपार्श्वदः। उत्तरभागे कुमुदः। एकैकस्य दशसहस्रयोजनान्नत्यं

---

[1]अ. इलावृतखण्डश्चतुस्त्रिंशत्सहस्र

[2]अ. तदुपरि तन्मध्यभागे चतुरस्रं दशसहस्रपरिमितप्रदेशो ब्रह्मस्थानं । तस्याष्टभागेषु अष्टौ सहस्रयोजनप्रदेशानंतरे अष्टदिक्पालकानां गृहाणि सार्धद्विसहस्रयोजनायामतया संति । एषाः तद्गृहाणां पृष्ठभागे मेरोरग्रस्य सर्वत्र पंचशतयोजनायामप्रदेश उर्वरितोऽस्ति ।

तावदायामश्च । मन्दरोपरि चूतवृक्षः । क्षीरन्ह्रदः । नन्दनवनं । तथा मेरुमन्दरोपरि जम्बूवृक्षः । मधुन्हदः । चैत्रवनं । सुपार्श्वदोपरि कदम्बवृक्षः । इक्षुन्हदः । वैभ्राजकवनं । कुमुदोपरि न्यग्रोधवृक्षः शुद्धजलन्ह्रदः । सर्वतोभद्रवनम् । एषां वृक्षाणां मध्ये एकैकवृक्षः एकादशयोजनोन्नतः । शतयोजनस्थूलः । मेरोरधः केसरपर्वताः । कुरङ्गः कुररः कुमुमः वैकङ्कः चित्रकूटः त्रिशिरः पतंङ्गः रुचकः निपदः रुशतिवासः कपिलः शंखवैडूर्यः[1] । पारधिः हंसः वृषभः नागकालः पानोदः एवमेते अष्टादश केसरपर्वताः ।। ततः परिस्तरणपर्वताः । पूर्वभागे जटरदेवकूटाविति द्वौ । दक्षिणभागे कैलासकरवीराख्यौ ।। पश्चिमभागे पवनपारियात्राभिधौ द्वौ । उत्तरभागे शृङ्गवान् करवानिति द्वौ । एवमेते अष्टौ परिस्तरणपर्वताः द्विसहस्रयोजनोन्नताः । अष्टादशसहस्रयोजनैः दक्षिणोत्तरायामाः । एवं प्रकाशमानमेरोरुपरितनमध्यभागे श्रीनारायणो वृश्चिकाकारेण शिशुमाररूपेणाधोमुख मुपरिपुच्छतया वर्तते । एतदाश्रये सर्वे ग्रहाः प्रदक्षिणतया वर्तन्ते । राहुकेतू अपसंव्येन चरतः। तत्प्रकारः [2]सूर्यमंडलं सहस्रं । चन्द्रमण्डलं विंशत्सहस्रं । राहूकेतूनां मंडलं द्विचतुश्चत्वारिंशत्सहस्रं । अतो मेरुव्यवधानेन ग्रहणादिव्यवहारः । एवं तावेव महाकोपेन निबिडान्धकारं कुर्वन्ति । तत एव स्वस्वगतिमपेक्ष्य वक्रातिचारतया संचरन्ति । तत कालमपेक्षा ध्रुवः सूर्यरथरज्जूनितस्ततो न्यूनाधिकतया अतिदृढसंगृहणं कुर्वति सति उत्तरायणदक्षिणायनें भवतः ।।

---

[1]अ. शंखः वैडूर्यः [2]सूर्यमण्डलं दशसहस्रं ।

इतः परं नवग्रहाः भूम्यपेक्षया कियद्दूरे सन्ति, इत्युक्ते भूम्युपरि राहुकेतुमण्डलं दशसहस्रयोजनेऽ(नं.)स्ति । सूर्यमंडलम् एकलक्ष-योजने । चन्द्रमंडलं लक्षद्वये । शुक्रमंडलं लक्षचतुष्टये । बुधमंडलं षट्लक्षं । मंगलमंडलम् अष्टलक्षं । बृहस्पतिमंडलं दशलक्षं । शनैश्चरमंडलं द्वादशलक्षं । [1]सप्तर्षिमंडलं दशलक्षं । ध्रुवमंडलं षट्त्रिंशल्लक्षं । सूर्यरथः मेरोः समीपे अस्ति । तस्य सुवर्णात्मकं श्रीविष्णुना व्याप्तं एकचक्रं । एतस्यैको भागः, मेरोरुपरि । अधर-भागे ध्रुवमंडलपर्यन्तं षट्त्रिंशल्लक्षणयोजनः । तस्य सप्ताश्वाः । अरुणः सारथिः । तच्चक्रं पुष्करद्वीपे भ्रमति । द्विवारात्रिषष्ठिघ-टिकात्मककालस्य रथ (रवि) चक्रं नव कोटयेकपञ्चाशल्लक्षयोजनं भ्रमति । मेरुपर्वतमध्यान्मानसोत्तरपर्वतमध्यस्य पूर्वभागस्य एककोटिसप्तपंचाशल्लक्षषट्पञ्चसहस्रयोजनम् । मेरोः पश्चिमस्य त्रिकोटिपञ्चाशल्लक्षम् । एतत् त्रिगुणं सर्वत्र प्रदक्षिणीकरणें नवकोटिचत्वारिंशल्लक्षं भवति । सूर्यरथः द्वात्रिंशत्सहस्रपञ्चाशदा-यामः । रथचक्रं सप्तनवतिसहस्रं पंचाशतमुन्नतं तद्युगस्य विस्तृतिः। द्विलक्षं मेरोरुपरि ततः ब्रह्मसभायां बहिरावरणोदकं पतित्वा चतुर्दिक्षु भागचतुष्टयेन गच्छति । पूर्वदिशि मन्दाकिनी । दक्षिण-दिशि अलकनन्दिनी, । भगीरथेन प्रार्थितत्वाद्भागीरथी । पश्चिमे चक्षुरिति । उत्तरे भद्रेति । ततः सप्तद्वीपाधिपतिप्रियव्रतराज्ञः सप्त पुत्राः । आग्नीध्रस्य जम्बुद्वीपः, इध्मजिह्वस्य प्लक्षद्वीपः,

---

[1] अ. सप्तविंशतिलक्षं क. सप्तर्षिमण्डलं त्रयोविंशतिलक्षं

यज्ञबाहोः शाल्मलिद्वीपः, हिरण्मयस्य कुशद्वीपः, धृतपृष्ठस्यः क्रौञ्च द्वीपः, मेधातिथेः शाकद्वीपः वीतिहोत्रस्य पुष्करद्वीपः एवं विभागः ।। ततो जम्बुद्वीपाधिपतेराग्नीध्रस्य नव सुताः । जम्बुद्वीपमध्ये चतुरस्रं द्वात्रिंशत्सहस्रं इलावृतखण्डः । तस्य तन्नामा राजा तस्मिन्पार्वतीरुद्रान्तर्गत एवोपासनीयः। तत्र चतुर्दिक्षु भागीरथीति नदी। तत्र द्विसहस्रायामः चतुस्त्रिंशत्सहस्रोन्नतो गन्धमादनाख्योमर्यादा पर्वतः। ततः एकत्रिंशत् सहस्रयोजनो भद्राश्वखण्डः । तस्य तन्नामक राजा। हयग्रीवः उपासनीयः । मन्दाकिनीति भागीरथी । मेरोः पश्चिमस्येलावृतं संबध्य द्विसहस्रायामः। चतुस्त्रिंशत्सहस्रोन्नतो माल्य-वान् मर्यादागिरिः। तत एकत्रिंशत्सहस्र। केतुमालाखण्ड। तस्य खडस्य तन्नामकराजः। रतिकामान्तर्गत उपासनीयः । चक्षुरिति भागीरथी। एवमेतत्खंडत्रयं मृदङ्गाकारेणास्ति । ततो मेरोरुत्तरे त्रयो मर्यादा गिरयः । इलावृतखण्डं सम्बध्य तिर्यक् लक्षोन्नतद्विसहस्रायामः। नीलाख्यमर्यादागिरिः । ततो नवसहस्ररमणखण्डः । तस्य तन्नामा राजा। तत्र वैवस्वतमनुना मत्स्य उपासनीयः। भद्रेति भगीरथीति। तत्संबंध्य तिर्यङ्नवतिसहस्रः द्विसहस्रायामः श्वेताख्यमर्यादागिरिः। ततो नवसहस्रो हिरण्मयखण्डः तस्य तन्नामा राजा। पितृगणाधिपेन अर्यम्णा कूर्मः उपासनीयः । भद्राख्या भागीरथी। ततो द्विसहस्रोन्न-तायामः तिर्यगशीतिसाहस्रः श्रृंगवानिति मर्यादागिरिः ।। ततो नवसहस्रः कुरुखण्ड। तस्य तन्नामा राजा। भूम्या भूवराहः

---

[1] अ. ततो नवसहस्रः इत्यारभ्य हेमकूटमर्यादागिरिपर्यन्तो भागः नोपलभ्यते।

उपासनीयः । तत्र भद्राख्या भागीरथी। एतत् खण्डत्रयं धनुराकारतया अस्ति। मेरोर्दक्षिणस्थं च मर्यादागिरित्रयं खण्डत्रयं च । इलावृतखण्ड संबध्य तिर्यक् लक्षद्विसहस्रोन्नतायामः निषदाख्यमर्यादागिरिः ॥ [1]ततोः नवसहस्रः हरिवर्षः । तस्य तन्नामाधिपः । तत्र प्रल्हादो नरसिंहोपासनं करोति । अलकनन्दीति नदी । तत्संबंध्य द्विसहस्रोन्नतायामः दैर्घ्ये नवतिसहस्रयोजनः तिर्यङ्नवसहस्रः हेमकूटमर्यादागिरिः ॥ ततो नव सहस्र : किंपुरुषखण्डः। तस्य तन्नामा राजा। तत्र हनूमान् श्रीरघुनाथोपासनं करोति । अलकनन्दिनीति भागीरथी । ततो द्विसहस्रोन्नतायामः । तिर्यङ्नवसहस्रः हिमालयाख्यमर्यादागिरिः । ततो नवसहस्रयोजनो साधनसंपत्तियोग्यो भारतखण्डः । तस्य तन्नामा राजा। भरत पालितत्वाद्भारतमिति नाम । तत्र नारदः नारायणोपासां करोति । अलकनन्दनीति भागिरथी । त्रयःखण्डाः अपि धनुराकाराः ।

अत्रैवं विवेक :- पंचमस्कन्धे पुराणवाक्यमेकैकं खण्डं नव सहस्रमिति वदन्ति । तत्प्रकारेण खंडत्रयं मर्यादागिरिद्वयं । एतत्सहस्रस्यायामे[1] मिलित्वैकत्रिंशत्सहस्रं भवति । लक्षस्यातीव न्यूनम् । तथा दक्षिणोत्तरस्येलावृतखण्डेन सह सप्त खण्डाः षण्मर्यादा गिरयः। मिलित्वैकसप्ततिसहस्रं भवति । तत्रापि लक्षस्य न्यूनम्। अतः पुराणान्तरानुसारेण मध्ये इलावृतखण्ड । चतुस्त्रिंशत्सहस्रं । मर्यादा पर्वतद्वयस्य चतुःसहस्रम् । एवमष्टत्रिंशत्सहस्रम् उर्वरितं द्विषष्ठि

[1] अ. एतत्सहस्रायामे मिलित्वैक

सहस्रं विभज्य भद्राश्वखण्डस्यैकत्रिंशत्सहस्रं, केतुमालखण्डस्यैक त्रिंशत्सहस्रं । एवं प्रमाणार्थोऽवगन्तव्यः । नवसहस्रमिति यत्प्रमाणं वदन्ति तत् चतुरस्राकारमृते । तत्तत्खण्डस्य धनुराकारत्वादेकदेश-मादाय तथा वदन्ति ।

अथवा -- तिर्यक् भूमिमितिवत् फलितगणनं वा । इलावृतखण्डः चतुरस्रं चतुस्त्रिंशत्सहस्रः । तन्मध्ये मेरुः षोडशसहस्रेण व्याप्त नव सहस्रमुर्वरितं समानं । भद्राश्वकेतुमालखण्डयोः कथमित्युक्ते तिर्यङ् मृदङ्गाकारः । तयोः मृदङ्गाकारत्वेन कारणेन उत्सवे ललाट भूषणाकारवते खण्डे वर्तते तिर्यग्भूमीतिवत् । तयोरपि चतुरस्रं नवसहस्रमेवं यथोक्तमर्गीकार्यम् । एवं लक्षयोजनात्मकजम्बद्वीपस्य कङ्कणाकारेणावृतो लवणोदधिः एक लक्षयोजनः । तन्मध्ये लंका-द्वीपादिद्वीपाः वर्तन्ते । तदावरको द्विलक्षः प्लक्षद्वीपः । तस्य प्रियव्रतद्वितीयपुत्रः इध्मजिह्वाख्यः अधिपः तस्य सप्त पुत्राः । प्लक्षद्वीपस्य सप्त खण्डाः । तत्र प्रथमतः मणिगिरिरिति मर्यादा गिरिः तत्संबध्य शिवरायखण्डः तस्य तन्नामा राजा । आरण्याख्या नदी । द्वितीयखण्डस्य स्वर्णकूटाभिधमर्यादागिरिः । तत्संबध्य शताख्यखण्डः । तस्य तन्नामा अधिपः । [1]नृगणाख्यनदी । तृतीय खण्डस्यैन्द्रसेनाख्यमर्यादागिरिः । तसंबध्य सुभद्राखण्डः । तस्य तन्नामा स्वामी । अंगिराख्या नदी । चतुर्थखण्डस्य ज्योतिष्मानिति मर्यादागिरिः तत्संबध्य शताख्यखण्डः[2] । तस्य तन्नामाऽधिपः ।

---

[1] अ. तत्संम्बध्य यशः खण्डः

[2] अ. सावित्र्याख्यनदी । पञ्चमखण्डस्य धूम्रवानिति मर्यादागिरिः। तत्संबध्य यशःखण्डः । तस्य तन्नामा राजा नृगणाख्या नदी

सावित्र्याख्यनदी । पंचमखंडस्य धूमवानिति मर्यादागिरिःततः क्षेमखण्डः । तस्य तन्नामा स्वामी ।सुभद्राख्यनदी ।ततो हिरण्वया-ख्यमर्यादागिरिः । अभयाख्यखण्डः । तन्नामा स्वामी (तुंम्वरनदी) सत्यंभरनदी । ततो मेघमालाख्यमर्यादागिरिः। [3]एतादृशप्लक्षद्वीपस्य आवरकः इक्षुरससमुद्रः द्विलक्षयोजनः । एतदावरकः चतुलक्षयोजनः सप्त खण्डात्मकः शाल्मलिद्वीपः तस्य मज्रबाहुरित्यधिपस्तस्य सप्त पुत्राः । तत्रादौ स्पर्शाख्यमर्यादागिरिः। सुरोचनखण्डः तन्नामाधिपः। अनुमत्याख्यनदी । ततः शतशृङ्गाख्यगिरिः । सौमनुष्याख्यखण्डः। तस्य तन्नामाधिपः । शिनीवालीनदी - ततो वामदेवाख्यमर्यादागिरि. । रमणखण्डः । तस्य तन्नामा राजा । सरस्वती नदी । ततः कुंदराख्य (कन्दकाख्य) मर्यादागिरिः । देवबर्हखण्डः । तस्य तन्नामा राजा । कुहूनदी । ततः कुमुदाख्यमर्यादागिरिः । वलभद्राखण्डः । तस्य तन्नामा राजा । राजनी नदी । तत. पुष्पवर्णमर्यादागिरिः ।[1]आप्या-ख्यखण्डः । तस्य तन्नामा राजा । नन्दा नदी । ततः सहसतिरिति मर्यादागिरिः । अभिजाताख्यखण्ड. । तस्य तन्नामा राजा। राका नदी ।

सप्तखण्डाः समाः :– एतच्छाल्मलीद्वीपस्यावरक. सुरोदधिः । चतुर्लक्षयोजनः तदावरकः सप्तखण्डः (त्मको अष्ट) त्मको त्र्यष्ट-लक्ष्-योजनः कुशद्वीपः । एतस्य हिरण्यरेता राजा । तस्य सप्त

[3] क. अभयखण्डः । तन्नामास्वामी । सत्यभरनदी

[1] अ. रजनीनदी । ततः पुण्यवर्तमर्यादागिरिः आप्याख्यखण्डः ।

पुत्राः । तत्रादौ चक्राख्यमर्यादागिरिः वसु (माल)यानखण्डः। तन्नामा राजा । रसकुल्या नदी । कृतशृंगाख्यमर्यादागिरिः । दृढकविखण्डः तस्य तन्नामा राजा । मधुकुल्यनदीं । पिप्पलाख्यमर्यादागिरिः । नागाग्यखण्डः । तन्नामा राजा। सुविन्ध्य नदी। चित्रकूटमर्यादागिरिः। अभिगुप्तखण्डः । तन्नामा राजा । मित्रविंदा नदी । देवानीक मर्यादागिरिः । सत्यव्रतखण्डः । तन्नामा राजा । वेदगर्मा नदी । ऊर्ध्वरोमा मर्यादागिरिः। प्रियव्रतखण्डः। तस्य तन्नामा राजा । घृतच्युता नदी । द्रविणाख्यमर्यादागिरिः। वामदेवखण्डः। तन्नामाऽधिपः । मंत्रमाला नदीं । एते सप्तखण्डाः समाः । एतत्खण्डावरकः सर्पिः समुद्रोऽष्टलक्षयोजनायामः । तदावरकः षोडशलक्षयोजनः सप्तखंडात्मकः क्रौंचद्वीपः तस्य घृतपृष्ठराजा । तस्य सप्त पुत्राः । तत्रादौ शुकाख्यमर्यादागिरिः अमोघखण्डः । तन्नामा राजा अभयनदी । वर्धमानमर्यादागिरिः मध्वर्हखण्डः । तन्नामाऽधिपः । अमृतोत्थनदी । उपवर्हमर्यादागिरिः । मेघपृष्ठखण्डः । तन्नामा राजा । आर्यकनदी । उपभोजनमर्यादागिरिः सुधामखण्डः । तन्नामा राजा । तीर्थकवती नदी । नन्दाख्य मर्यादागिरिः । ऋषि (ज्वाला) खण्डः । तन्नामा राजा । रूपवती नदी । जघनाख्यमर्यादागिरिः लोहास्तरणखण्डः । तन्नामा राजा । पवित्रनदी । सर्वतोभद्राख्य मर्यादागिरिः । वनस्पतिखण्डः । तन्नामा राजा । शुक्लवती नदी । सप्तखण्डाः समाः । क्रौंचद्वीपावरकः षोडशलक्षयोजनो दधिसमुद्रः । एतदावरकः द्वात्रिंशल्लक्षयोजन. शाकद्वीपः । तस्य मेघातिथिः राजा । तस्य सप्त पुत्राः । तत्रादौ ईशानाख्यमर्यादागिरिः । पुरोचनखण्डः । तन्नामा राजा । अनघनदी । उव्र(रु) शृंगाख्य

मर्यादागिरिः। मनोजवखण्डः। तस्य तन्नामा राजा। आयुर्दा नदी। बलभद्राख्यमर्यादागिरिः। पवमानखण्डः। तन्नामा राजा। उभयस्पृष्ट नदीं। केसराख्यमर्यादागिरिः। धूम्रानीक (धूमनि) खण्डः। तन्नामा राजा। अपराजितनदी। सहस्रश्रोताख्यमर्यादागिरिः। चित्ररेकाख्यखण्डः। तन्नामाऽधिपः। पंचपादी नदी। देवलाख्य मर्यादागिरिः बहुरूपाख्यखण्डः। तन्नामाऽधिपः। सृत्याख्या (सत्याख्या) नदी। मानस्यस्वाख्यमर्यादागिरिः। स च विश्वधाराख्य (विश्वंभर) खण्डः। तन्नामा राजा। निजधृति नदी। सप्तखण्डाः समाः। एतस्यावरकः द्वात्रिंशल्लक्षयोजनः क्षीरसमुद्रः। चतुर्षष्ठिलक्षयोजनो द्वीपद्वयात्मकः पुष्करद्वीपः अस्य वीतीहोत्राख्याधिपः तस्य द्वौ पुत्रौ। तत्रादौ रमणखण्डः। तन्नामाधिपः। धाताख्यखण्डः। तन्नामा राजा। एतयोर्मध्ये कंकणाकारेण मानसोत्तराख्यमर्यादागिरिः। स च दशसहस्रयोजनोन्नतायामाभ्यां युक्तः। तदुपरि सूर्यरथचक्रं भ्रमति। तत्राष्टदिक्पालकपुराणि सन्ति। एतत्पुष्करद्वीपावरकः चतुःषष्ठियोजनात्मकस्वादूदकाब्धिः। तदावरका सार्धलक्षयोजनात्मकवज्रभूमिः। तदावरकः सार्धचतुर्लक्षाधिकनवतियोजना सुवणभूमिः। तदावरक लोकगिरिः। अयं पंचाशल्लक्षः स्वर्गलोक पर्यन्तोन्नतः तावदायाम इति पंचमस्कन्धे तत्रापि।

श्रीमदाचार्यैः – पंचाशत्सहस्राधिकपंचाशल्लक्षयोजनायाम इत्युक्तम्। **तट्टीकाकारा** :– एकपंचाशल्लक्षयोजनायाम इतिः वदन्ति।

[1]**केचनः**—तं पक्षमाश्रित्य भुवः स्वर्गमध्येक पंञ्चाल्लक्षमित्यु-क्तोर्वरितं भूकन्दान्त. प्रविष्टमिति वदन्ति ।

प्रमाणान्तरे तु पंचाशल्लक्षमिति भाति । अतएव तद्विचारणीयं। एतल्लोकालोकगिर्य्युपरि चतुर्दिक्षु इन्द्रादिलोकपालकानां भुवनानि सन्ति । अत्र अष्ट दिग्गजा वर्तन्ते । तथा अधोलोकाः । ब्रह्माण्डाग्रं सम्बध्य सन्तीति पक्षे नरकलोकान्प्रति गन्तृणां दक्षिणदिशि द्वाराणि सन्ति । लोकालोकपर्वतस्य इत एव सूर्यप्रकाशः पर्वतात्परस्तात्स्व प्रकाशः । लोकालोकगिरेरावरकं सप्तकोटियोजनं तमः । तदावस्कं चतुर्दशकोटियोजनायाममेककोटयुन्नतंब्रह्माण्डपर्यन्तं घनोदकमस्ति। सर्व मिलित्वा जम्बूद्वीपमारभ्य ब्रह्माण्डनेमिपर्यन्तं पंचाशत्सहस्राधिकंपंचत्रिंशत्कोटियोजनानि गणितानि । तथात्वे पंचाशत्सहस्रमधिकं जातम् । तस्य तु जम्बूद्वीपः पूर्णलक्ष इति न ग्राह्यः। किन्तु मेरुमध्यमारभ्य जम्बूद्वीपः पंचसहस्रात्मक इत्येवंग्राह्यः । अतः अधिकं पंचाशत्सहस्रमेतज्जम्बूद्वीपमध्य एव गतम्। ततो मेरुमध्यमादाय ब्रह्माण्डपर्यन्तं पंचाशत्कोटियोजनानीत्यवगतव्यम् । तथोत्तरभागे तथेतर पंचविंशत्कोटियोजनानि मिलित्वा पंचाशत्कोटियोजनानि । ततो ब्रह्माण्डान्तः उर्ध्व चतुर्दशलोकगणनम्। ब्रह्माण्डपुराणोक्तानुसारेण भुवोऽन्तरिक्षलोको लक्षयोजनः । भुवः स्वर्गलोकः पंचल्लक्षयोजनः । तद्दलं पंचाशत्सहस्रं स्वर्गेण महर्लोकः पंचसप्ततिलक्षयोजनः । तद्दलं पंचविंशल्लक्षाधिकैककोटियोजनम

१ अ. इदं वाक्यं नोपलभ्यते ।

तद्दलं तस्माज्जनो लोकः एककोटिद्वादशलक्ष पंचाशत्सहस्रयोजनः तद्दलं सार्धैककोटयात्मकं । तस्मात्तपोलोकः एककोटयष्टषष्ठिलक्ष पंचसप्ततिसहस्रयोजनः। तद्दलं सार्धैककोटियोजनम्। तस्मात्सत्यो लोकः । चतुःकोटिषड्लक्षपंचविंशत्सहस्रयोजनः तद्दलं सार्धैककोटियोजनम् ।तस्य विरजापरनामिका गंगा आवरणभूता । तस्मात् वैकुण्ठः अष्ट कोटिद्वादशलक्षपंचाशत्सहस्रयोजनः । तद्दलं द्विकोटिसार्धनवनवतिलक्षपंचाशत्सहस्रयोजनं । एतत्सर्वं मिलित्वा भुवः सकाशात् ब्रह्माण्डखर्परपर्यन्तं पंचविंशतिकोटियोजनानि । एतन्मध्ये अन्तरिक्षभूतः स्वर्गः कोटियोजनायामः सन् छत्राकारेणास्ति । तदुपरि उर्वरिताः सर्वे लोकाः ब्रह्माण्डाग्रपर्यन्त सन्ति । ततो भुवः अधोभागे पञ्चाशतकोटि योजनानि ।

योजनानां विवेकस्त्वित्थम् :– भूदलं द्विसहस्रयोजनं । ततोऽवोऽतललोकावकाशो दशसहस्रयोजनः । तद्दलमपि द्विसहस्रं । ततो वितललोकावकाशो दशसहस्रयोजनः । तद्दलमपि द्विसहस्रयोजनम् । ततो दशसहस्रयोजनतः सुतललोकावकाशः । तद्दलं द्विसहस्रं । ततस्तलातलंलोकावकाशो दशसहस्रयोजनः । द्विसहस्रं तद्दलम् । ततो दशसहस्रयोजनो रसातलावकाशः। तद्दलं द्विसहस्रं । ततो महातलावकाश. दशसहस्रः तद्दलं द्विसहस्र । ततः पातालं दशसहस्र । तद्दलं द्विसहस्रम् । ततोऽधो नरकलोकावकाशो द्वादसहस्रयोजनं। तद्दलं द्विसहस्रम्। तदावरकस्थनरकाणि । तामिस्रमन्धतामिस्रं रौरवोमहारौरवः कुम्भीपाकः कालसूत्रं असिपत्रं

सूकरमुखं अन्धकूपः क्रिमिभोजनं श्वदंशकः वज्रकंटकः शाल्मली वैतरणी पूयोदा प्राणरोधनं मुसरक्षिः विपाशनः लालाभक्षः सारमेयादनः विचारः रेतोपानं क्षारकर्दमः रक्षोगणभोजनम्। शूलप्रोतः दन्दशूकः अवकण्ठनिरोधनं परिवर्तनं सूचीमुखम् । एतद्गमने द्वारं। भरतखंडदक्षिणभागे गोकर्णाख्यम्। एते लोकाः ब्रह्माण्डाग्रपर्यन्त भरतखण्डाधोभाग एव दशसहस्रायामेन बिलाकारतया सन्ति। ततः पाताल्लोके भूमि शेषो विभर्ति । तदाधारः कूर्मः ततो वायुः ततो लक्ष्मीः तदाधारः परमपुरुषः । अधो लोकाः सर्वैः नरकैः सह लक्षयोजनाः। उर्वरितं किंचिन्यूनं विशत्कोटियोजनं गर्भोदकम् : एवमधोपरि पंचाशत्कोटियोजनम्। ततो नारायणधामत्रयम् : घनोदकोपरि ब्रह्माण्डाग्रपर्यन्त कंङ्कणाकारेण लक्षद्वयमनन्तासनं। तन्मध्ये लक्षयोजनोन्नतायामाभ्यां श्रीभागः। ततो ब्रह्माण्डाग्र संबध्य दशसहस्रोन्नतायामाभ्यां दुर्गाभागः। इतो घनोदकं संबध्य दशसहस्रयोजनोन्नतायामाभ्यां भूभागः। श्रीभागभूभागयोर्मध्ये दशसहस्रयामेन ण्याख्यामृतोदधिः । श्रीभागदुर्गाभागयोर्मध्ये दशसहस्रविस्तृतः ण्यानामोमृत समुद्रः । मध्ये मध्ये योग्यतास्थलं विहाय षष्ठिसहस्रम् । एतादृशानन्तासने अनन्तशयनमूर्तिः क्षीरसमुद्रमध्ये विशल्लक्षायामाः। पञ्चाल्लक्षयोजनोन्नतः श्वेतद्वीपः कंङ्कणाकारेणास्ति । तन्मध्येऽष्टलक्षयोजनायामः । पञ्चाशल्लक्षयोजनोन्नतः । श्रीभागः स्वर्गपर्यन्तः । ततः षड्लक्षयोजनन्नतायामाभ्यां दुर्गाभागः । ततः षड्लक्षयोजनोन्नतायामाभ्यां भूभागः । श्रीदुर्गाभागयोर्मध्ये ण्याख्यामृतसमुद्रः एकलक्षयोजनः।

श्रीभूभागयोर्मध्ये अराख्यामृतसमुद्रः एकलक्षयोजनः। श्रीभागे सर्वावतारैक्याश्रयः श्रीपद्मनाभः। श्री तथा क्षीरसागरे वैजयन्त्याख्यो गिरिः। तत्र ब्रह्मा तपः करोति। ततः सत्यलोकोपरि वैकुण्ठः। तन्मध्ये अष्टाविंशत्कोटियोजनायामः श्रीभागः। तस्यादितो भागे दुर्गाभाग भाग एककोटचायामः। ततः श्रीभागात्परस्तात् एककोटचायामे भूभागः। भागत्रयौन्नत्यं समम्। तिर्यक् पूर्वपश्चिमयोः ब्रह्माण्डाग्र-पर्यन्त श्रीदुर्गाभागयोर्मध्ये अराख्यामृताब्धिः द्विलक्षायामः। श्रीभूभागयोर्मध्ये अराख्यामृताब्धिः द्विलक्षायामः। श्रीभागे वैकुण्ठ मूर्तिः। वैकुण्ठस्य विरजानदी परिस्तरणतयास्ति। तत्र श्रीभागे नन्द काख्यसिंहासनम्। सिंहिकाख्यप्रासादः। पञ्चाशत्कोटचायाम ब्रह्माण्डस्य पृथिवी कोटिशतेनावलिप्ता। मेरुमध्य गृहीत्वा ब्रह्माण्ड पर्यन्त ब्रह्माण्डदलं पञ्चाशत्कोटियोजनम्। बहिरावरणतत्वानि एकैकापेक्षयैकैकं दशाधिकम्। शतकोटिपृथिव्या दशाधिक्येन आपः अर्बुदः अब्जः तद्दशाधिकं। एकनिर्वुदं तेजः। तद्दशाधिकैकखर्वो वायुः। तद्दशाधिकैकमहाखर्वमाकाशम्। तद्दशाधिकैकाक्षोण्यहङ्कारः। तद्दशाधिकैकमहाक्षौहिणी महत्तत्वम्। तद्दशाधिकैकनिधिः गुणत्र-याख्यमव्याकृतव्यक्ततत्त्वं। मेरुमध्यमारभ्य अव्याकृताव्यक्त त्वपर्यन्तं गणनं एकनिधिः एकमहाक्षोहिणी एकाक्षोहिणी एकमहा-खर्वः एकखर्वः एकनिर्वुदः शतकोटिपंचसप्ततिकोटचव्यक्ततत्वस्य आवरकं अनिरुद्धरूपम्। तदावरकं प्रद्युम्नरूपं। तदावरकं संकर्ष-णरूपम्। तदावरिका लक्ष्म्यात्मिका प्रधानविरजा नदी। तदावरकं वासुदेवरूपम्। इमानि नारायणापरिच्छिन्नरूपाणि। तदावरकं

अपरिच्छन्नरूपम् । एवं वहिरावरणसहितब्रह्माण्डमध्यस्थ भूमि श्वेतवराहो दधार । एतादृशवराहाय नमः ॥

॥ एवं प्रमेयसंग्रह : संपूर्णः ॥

अथैनमिति देवाः प्राणाः अमृता आविशंति। एतस्यायमर्थः । 'अथ मुक्त्यनंतरं एवं सप्तान्नविदं मुक्तं एते प्राणाः वाङ्मनःप्राणाः भिमानिनः सरस्वत्यादयो देवाः अमृतात्मकाः सन्तः स्वरूपभूतवागा दिनियामकत्वेन आविशन्ति । अत्र मुक्तजीवप्राणप्रदेशः वायोरु-ध्यमानः विरिञ्चस्यैव रूपान्तरेण ज्ञेयम् । अत्रैव बृहदारण्यक भाष्यम् मुक्तानां देववागादिरावेशः संप्रकीर्तितः । इति

इति श्री राघवेन्द्रयतिकृतः प्रमेयसंग्रहः समाप्तः

॥ श्रीराघवेन्द्राय नमः ॥